# कृष्ण यजुर्वेद

# तैत्तिरीय शाखाऽनुबन्धः




श्रुतिस्मृति पुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोक शङ्करम् ॥




**शारदा शारदाम्भोज वदना वदनाम्बुजे ।**
**सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ॥**

# Jagadguru Shankaracharya Sri Sri Bharati Tirtha Mahasannidhanam

THE 36TH ACHARYA OF DAKSHINAMNAYA SRI SHARADA PEETHAM, SRINGERI



अज्ञानां जाह्नवी तीर्थं विद्या तीर्थं विवेकिनाम् ।
सर्वेषां सुखदं तीर्थं भारतीतीर्थमाश्रये ॥

*While Ganga is the Tirtha (place of pilgrimage) for the ignorant*
*and knowledge is the Tirtha for the wise,*
*I take refuge in Jagadguru Sri Bharati Tirtha,*
*who is the bliss-giving Tirtha for all.*

# Jagadguru Shankaracharya Sri Sri Vidhushekhara Bharati Sannidhanam

THE 37TH ACHARYA OF DAKSHINAMNAYA SRI SHARADA PEETHAM, SRINGERI



विद्याविनयसम्पन्नं वीतरागं विवेकिनम् ।
वन्दे वेदान्ततत्त्वज्ञं विधुशेखरभारतीम् ॥

*I offer my prostrations to Jagadguru Sri Vidhushekhara Bharati Mahaswamiji,*
*who is endowed with knowledge and humility, who is free of desires,*
*who is endowed with discrimination (of the real and unreal),*
*and who is a knower of the Vedanta Tattva.*

॥ श्री गुरुभ्यो नमः ॥

श्री मन्मथ तुला कृष्ण षष्ठ्यां आर्द्रभ संयुते ।
भानुवारे शृङ्गगिरौ क्षेत्रे तुङ्गा तरङ्गिते ॥
श्री शारदाम्बा सान्निध्ये ब्रह्मविद्या प्रचारकैः ।
विधुशेखर सच्छिष्य सेविताङ्घ्रि सरोरुहैः ॥
श्री भारतीतीर्थ पादैः शृङ्गेरी पीठ पालकैः ।
छात्राणामानुकूल्याय विदुषां मोदनाय च ॥
तैत्तिरीयाऽनुबन्धोऽयं आविष्कृतो विराजताम् ।
प्रसारमेतु सर्वत्र सद्गुरोः कृपया सदा ॥

Released by Sri Sringeri
Sankaracharya Ananthasri Vibhushita
Bharathi Theertha Mahaswamigal
on 01.11.2015 at Sri Sringeri
Jagadguru Sankaracharya
Samsthanam, Sringeri

# कृष्णयजुर्वेद
# तैत्तिरीय शाखाऽनुबन्धः

# Krishna Yajurveda
# Taittireeya S'aakha Anubandha

शं. कुळत्तु हरिहरपुत्र शर्मणा सङ्कलितम्

**Compiled by : S. Kulathu Hariharaputra S'arma**

**Krishna Yajurveda Taittireeya S'aakha Anubandha**


| | | |
|---|---|---|
| Published in | : | August 2015 |
| Subsidised Price | : | **Rs.200/-** |
| Laser Typesetting by | : | **Sri G. Periyasamy,** Trichy<br>**Sri Maruthy Laser Printers**<br>173, Peters Road, Indira Garden,<br>Royapettah, Chennai - 14<br>Ph: 044 - 28524256 |
| Copies can be had from | : | **1. S. Kulathu,**<br>**"Seshachalam"**<br>No.5, Bheemanna Garden street<br>Abhiramapuram, Chennai - 600 018<br>Ph : 9840071165<br>Email : skulathubhuvana@yahoo.co.in<br>kulathu.venkat@gmail.com<br>balakrishnan.kulathu@gmail.com<br>Visit : www.kulathu.com |
| | | **2. K. Sankaranarayanan**<br>Flat No.4, MRC Sai Villa,<br>New No.7, Dr. Ranga Road,<br>Mylapore, Chennai - 600 004<br>Ph : 044 - 24618504 |
| Printed by | : | **RST Printers,**<br>140, Mundakakanni Amman Koil Street,<br>Mylapore, Chennai - 600 004<br>Ph : 044 - 24662054 |

# विद्वदभ्यर्थनम्

मनुष्याणां हितार्थं सर्वज्ञानप्रकाशनाय ऋगादि वेदरूपं शास्त्रं प्रवृत्तम् । विद्यते ज्ञायते अनेन तत्वं जिज्ञासुभिः इति वेदः । सः मन्त्ररूपः ब्राह्मणरूपश्च इति प्रसिद्धः । मन्त्र भागस्तु जप होम स्तुति कर्मादिषु विनियुक्तः । मन्त्राणां गूढार्थप्रकाशनाय वेद मन्त्रार्थ अनुवादकत्वेन तद्विनियोगादि विधायकत्वेन च प्रवृत्तः गद्य गाथाद्यात्मकः ब्राह्मण भागः।

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो अध्येतव्यः ज्ञेयश्च' 'वेदो नित्यमधीयतां', 'योऽर्थज्ञ इत् सकलं भद्रमश्नुते' इत्यादिभिः प्रमाणैः वेदस्य प्रामुख्य वर्णनात् द्विजातिभिः वेदः अध्येतव्यः, भाष्यादि पाठेन तदर्थः वेदितव्यश्च इति सिद्धम्।

वेदाः अपौरुषेयाः, अनन्ताः, ऋग्वेदः यजुर्वेदः सामवेदः अथर्व वेदः इति चतुर्धा व्यस्ता भवन्ति। तत्र यजुर्वेदः शुक्लः कृष्णश्चेति अवान्तर भेदेन द्विधा नियतः । उभयत्रापि बह्व्यः शाखाः विद्यन्ते । तत्र कृष्ण यजुर्वेदस्य तैत्तिरीय शाखा दक्षिण भारते सुप्रसिद्धा भवति ।

कृष्ण यजुर्वेद तैत्तिरीयशाखा, संहिता, ब्राह्मणम्, आरण्यकम्, मन्त्र प्रश्नः इति चतुर्भागात्मिका विजयते । तत्र, संहिता चतुश्चत्वारिंशत् प्रश्नात्मिका सप्तकाण्डेषु विस्तृता । ब्राह्मणं अष्टकत्रये अष्टाविंशति प्रश्नात्मकं, आरण्यकम् दश प्रश्नात्मकं, एकाग्नि काण्ड इत्यपर नामा मन्त्र प्रश्नः प्रश्न द्वयात्मकः इत्याहत्य चतुरशीति प्रश्नाः सन्ति । 'भद्रं च सह संज्ञानं लोकस्तुभ्यमिति क्रमात्' इत्युक्ताः काठक संज्ञाः पञ्च प्रश्नाः तैत्तिरीय ब्राह्मणस्य तृतीयाष्टके दशम, एकादश, द्वादश प्रश्न रूपेण, आरण्यकस्य प्रथम, द्वितीय प्रश्न रूपेण च संगृहीताः । तथा तैत्तिरीयोपनिषदाख्य प्रश्न त्रयं, महा नारायणोपनिषच्च आरण्यकस्य सप्तमादि दशम प्रश्नरूपेण व्यवह्रियन्ते। आरण्यके तैत्तिरीयोपनिषदात्मकान् त्रीन् प्रश्नान् एक प्रश्न रूपेण गणयित्वा, तैत्तिरीयशाखायां अशीति द्वयं प्रश्नाः इति सांप्रदायिकैः व्यवह्रियते। एते सर्वेऽपि मूल ग्रन्थ रूपेण, भाष्य सहितं च मुद्रापिताः ।

अस्याः शाखायाः कानिचन वैशिष्ट्यानि सन्ति । यथा,

(१) संहिता, ब्राह्मण, आरण्यक भागेषु मन्त्र ब्राह्मणयोः साङ्कर्यं दृश्यते। संहितायां, ब्राह्मणे, आरण्यके च तत्र तत्र मन्त्राणां मध्ये ब्राह्मण भागोऽपि वर्तते । क्वचित् ब्राह्मण भागे मन्त्राः पठिताः । अत एव अस्य कृष्ण यजुर्वेद इति नाम संपन्नम् ।

(२) विद्यार्थिनां अध्ययनादि सौकर्यार्थं दीर्घे अनुवाके पञ्चाशत्पदेषु विरामः कल्पितः । तस्य पन्चाशतिः इति संज्ञाऽपि प्रसिद्धा । तथैव वाक्य रूपेण विद्यमान ब्राह्मण, आरण्यक भागयोः दश वाक्येषु विरामः, दशिनीति कथ्यते । पन्चाशति, दशिनी विराम स्थान द्योतनाय शृङ्खला वाक्यान्यपि अध्ययन काले अध्याप्यन्ते ।

(३) पूर्वं एकदा आगतानां मन्त्राणां उत्तरत्र आगमनसमये पुनः पठितव्यानां मन्त्राणां ज्ञापनार्थं मन्त्रप्रतीकमात्रं उच्यते । तादृश प्रतीक पाठाः शतश सन्ति ।

(४) संहिता पाठक्रमे एकस्मिन् मन्त्रे श्रुतस्य कस्यचिद्भागस्य विनियोगसमये मन्त्रान्तरेषु अनुयोजनं अनुषङ्गः इति कथ्यते । एवं बहवः अनुषङ्ग मन्त्राः सन्ति ।

(५) ब्राह्मण आरण्यक भागावपि प्रायशः संहितावत् नीचोच्च स्वार प्रचयादि चतुः स्वर युक्तौ भवतः ।

एतान् चतुरशीति प्रश्नान् अधिकृत्य काश्चन अनुक्रमणिकाः सङ्कलिताः -

(१) एतेषु चतुरशीति प्रश्नेषु प्रत्यनुवाकं प्रतिपादित विषयाणां अनुक्रमणिका - अस्यां तत्तदनुवाक संबन्धिनः मन्त्र भागस्य, ब्राह्मण भागस्य वा परिचयः निर्दिष्टः ।

(२) संहितायाः प्रथमादि प्रश्नेषु अन्तिमानुवाकेषु उक्तानां, तथा ब्राह्मण आरण्यक प्रश्नेषु च तत्र तत्र निर्दिष्टानां, विविधेष्टिषु यज्ञेषु च उपयुज्यमानानां याज्या पुरोनुवाक्या मन्त्राणां संग्रहः। अस्मिन् तत्तन्मन्त्रारंभः, ब्राह्मणभागः, देवतानाम च परिचिताः ।

(३) प्रतीक मन्त्राणां अनुक्रमणिका।

(४) प्रतीक मन्त्राणां अकारादि अनुक्रमणिका ।

(५) एकस्मिन् पदे द्विरुक्तिः - आम्रेडितम् ।

(६) प्लुत रङ्ग प्लुत स्वराः ।

(७) चतुरशीति प्रश्नानां प्रश्न, अनुवाक अनुक्रमणिका, मन्त्र विभाग संख्या सहिता ।

(८) ब्राह्मण आरण्यक मन्त्र प्रश्न अनुवाकानां अकारादि अनुक्रमणिका ।

(९) ब्राह्मण आरण्यक मन्त्र प्रश्नान्तर्गत मन्त्र विभागानां अनुक्रमणिका ।

(१०) ब्राह्मण आरण्यक मन्त्र प्रश्नान्तर्गत मन्त्र विभागानां तत्तत्प्रश्न, अनुवाक क्रममनुसृत्य अकारादि अनुक्रमणिका ।

(संहितायाः मन्त्र विभागाः, अनुवाक सूची, मन्त्राणां वर्णानुक्रम सूची च सातवलेकरकुलजेन श्री श्रीपाद शर्मणा मुद्रापित तैत्तिरीय संहितायां लभ्यन्ते ।

एते सर्वे तत्तद् भाष्येषु प्रश्नेषु च तत्र तत्र निर्दिष्टा अपि, छात्राणां आस्तिक महाजनानां वेद भाष्य जिज्ञासूनां च क्षिप्र अवलोकनार्थं, श्री शृङ्गेरी जगद्गुरूणां श्री भारतीतीर्थ महास्वामिनां महा सन्निधानानां, तदन्तेवासि श्री विधुशेखरभारती स्वामिनां च अनुग्रहमवलम्ब्य, यथामति सङ्कलितं **'कृष्ण यजुर्वेद तैत्तिरीयशाखाऽनुबन्धः'** इति नाम्ना मुद्राप्यते । अस्मिन् उद्यमे, मैलापूर् वेदभाष्यरत्नं, महामहोपाध्याय, ब्रह्मश्री डॉ. कृष्णमूर्ति शास्त्रिणः भृशं प्रोत्साहितवन्तः, अनुमोदितवन्तश्च, तदर्थं तेभ्यः हार्दिककृतज्ञतां निवेदयामि । अयं अनुबन्धः सर्वेषां उपयोगकरो भवेदिति विश्वसिमि ।

अस्मिन्नवसरे मम गुरवः स्मरणीयाः - वैक्कम् ब्रह्मश्री शंकरनारायण शास्त्रिणः (मम पिता), वैक्कम् ब्रह्मश्री सुब्रह्मण्य शास्त्रिणः (मम पितृव्यः, व्याकरण शिरोमणिः), तिरुवल्लिक्केणि ब्रह्मश्री लक्ष्मी नारायण शास्त्रिणः, लालगुडी ब्रह्मश्री गणेश शास्त्रिणः, ऋग्वेदाध्यापकाः - ब्रह्मश्री राम राव् महाशयः, ब्रह्मश्री सूर्यनारायण भट्टः ब्रह्मश्री स्वामिनाथ घनपाठिनः - एतेषां परिश्रमेण अनुग्रहेण च मया यथामति वेद, वेदभाष्यादि ज्ञानं संपादितम् । एतेषां चरणकमलेषु इदं सङ्कलनं सप्रश्रयं समर्प्यते।

अस्य ग्रन्थस्य गणिन्यां संयोजने तिरच्चि श्री पेरियस्वामी तथा मारुति लेसर् प्रिन्टेर्स सहायं कृतवन्तः, मुद्रापणं आर.एस्.टि. प्रिन्टेर्स द्वारा समापितं, एतेभ्यः हृदयपूर्वक धन्यवादं आविष्करोमि ।

अस्मिन् सङ्कलने मुद्रापणे च अज्ञानात्, विस्मृतेः, भ्रान्त्या वा स्खलन त्रुट्यादि दोषाः ये संभूताः, तान् तत्रभवन्तः विद्वांसः कृपया निवेदयन्तु इति सविनयं अभ्यर्थये ।

इत्थं

**शं. कुळत्तु हरिहरपुत्र शर्मा**

# Preface

Vedaas are the oldest scriptures meant for the welfare of the mankind. That which teaches the truth is the veda. It is in the form of a mantra which is applied in japa, homa, stuti etc. or in the form of a “braahmana” that is the explanation of the secret meanings of the mantraas, their practical applications etc. generally in the form of a prose or sentence.

The Authorities prescribe that vedaas should be studied by all dvijaas without expecting any benefit; one should daily recite his branch of the veda; he who knows the meaning of the vedaas attains all prosperities etc. It is therefore clear that veda should be studied without fail and its meaning understood, by going through the commentaries etc.

Veda is said to be ‘apourusheya’ that is, it is not written by any particular individual, but it is the breath of the Supreme being, descended through Maharshis. It is also endless. For convenience, it has been divided into four – Rigveda, Yajurveda, Saamaveda and Atharva veda. Of these, the Yajurveda is again split into two, ‘Krishna’ and ‘Sukla’. Both have a number of branches. In the Krishna yajurveda, the Taittireeya saakhaa (the branch called ‘Taittireeya’) is very popular in the southern parts of India.

The Krishna Yajurveda Taithireeya Saakhaa is in 4 parts as detailed below:

| | | Prasnaas (Chapters) | Anuvaakaas(Paragraph) |
|---|---|---|---|
| 1 | Samhita (in 7 Kaandaas) | 44 | 651 |
| 2 | Brahmanam (in 3 Ashtakams) including Kaat’akam | 28 | 338 |
| 3 | Aaranyakam | 10 | 250 |
| 4 | Mantra Prasnam | 2 | 40 |
| | Total | 84 | 1279 |

All these parts along with the commentaries are available in printed form.

This branch of the Krishna yajurveda has got certain specialities / peculiarities.

(1) In the Samhitaa, Braahmana and Aaranyaka sections, there is mixing up of mantra and braahmanabhaga. i.e. in between the mantras, the braahmanabhaga also comes. In some places, among the braahmanabhaaga, mantras also come in. That is why it is called ‘Krishna yajurveda’.

(2) For the convenenience of the students, in long paragraphs (anuvaakaas) of the samhitaa, there is a pause in every fifty words (padaas) and the group of 50 words is called ‘panchaasati’. Similarly, in Braahmana and Aaranyaka, there is pause in every 10 sentences called ‘dasini’. Equations indicating the pause in panchaasati or dasini are taught while teaching the vedaas.

(3) In the mantrabhaagaas, if a mantra which has already come elsewhere is to be repeated, only the beginning of that mantra is indicated, which is called ‘prateeka’. (The suggestion / practice is to repeat the relevant mantras in full, in practical application.)

(4) In mantraas, if some part is to be repeated in the subsequent mantras, only the beginning of the subsequent mantras are indicated, omitting the portion to be repeated. This is called ‘anushanga’. (In practical applications, the mantras to be repeated in full including the omitted portion as indicated.) There are many such anushanga mantras.

(5) The braahmana and Aaranyaka sections also mostly have four swaraas – Anudaatta, Udaatta, Swarita and Prachaya like the samhitaa.

In respect of these 84 chapters of the Taittireeya saakhaa, certain Anukramanikaas (Indexes) have been compiled:

(i) Vishaya anukramanikaa (subject index): indicating the subject matter in each Anuvaaka (paragraph) and reference to the corresponding braahmana or mantrabhaaga is given.

(ii) Yaajyaa Puronuvaakyaa sangraha: an index of mantras referred to at various places as Yaajyaas and Puronuvaakyaas with the corresponding Braahmana bhaaga and the deity referred to. In actual practice, in performing homam etc., the puronuvaakya is recited first followed by the Yajyaa mantra. (Such mantraas mainly occur in the last paragraph of each Chapter in the first four kaandaas of the samhitaa and rarely in other parts.)

(iii) Index of 'prateeka' mantraas (Prateekam is the insertion of beginning of mantraas found elsewhere as explained earlier.)

(iv) Alphabetical index of prateeka mantraas

(v) Plutha and Rangaplutha swaraas

(vi) Aamreditham (repetition of words in the same 'padam' – list of such words)

(vii) Index of anuvaakaas of all the 84 chapters with details of prasna, anuvaaka and mantra vibhhaaga

(viii) Alphabetical index of anuvakaas in Braahmanam, Aaranyakam and Mantra prasnam

(ix) Index of mantra vibhhaagaas of Braahmanam, Aaranyakam and Mantra prasnam

(x) Alphabetical index of (ix) above following the same order of the chapters / paragraphs.

[The mantra vibhaagaas of the Samhitaa, with an alphabetical index of its anuvvaakaas and mantra vibhaagas are already available in the Taithireeya Samhitaa of Saatwalekar edition.]

All the above materials, though available scattered in the Texts and Commentaries of the respective books, are now compiled as an Anubandha (Appendix), for purpose of ready reference for all who are interested in learning the vedaas and who desire to know about this part of the Krishna yajurveda, with the graceful blessings of the Sringeri Sankaraacharyaas Sri Sri Bharathi Theertha Maha Swamigal and Sri Sri Vidhu Sekhara Bhaarati Swamigal, and got printed. In this compilation, the Saayana Bhaashyam is mostly followed.

In this maiden attempt, Mahamahopaadhyaaya, Vedabhashya Ratnam, Brahmasri Dr. R.Krishnamoorthy Sastrigal of Mylapore encouraged me and guided me and I convey my heartfelt thanks to him.

On this occasion, I sincerely recall my vedic teachers – Vaikom Brahmasri Sankaranaaraayana saastrigal (my father), Vaikom Brahmasri Subrahmanya saastrigal (my paternal uncle, Vyaakarana Siromani), Thiruvallikkeni Brahmasri Lakshminaaraayana saastrigal, Laalgudi Brahmasri Ganesa saastrigal, Rigveda teachers - Brahmasri Raama Rao, Brahmasri Sooryanaaraayana Bhat, Brahmasri Swaaminaatha ghanapatigal, who gracefully spared their precious time in teaching me the vedic portions and bhaashyams and guided me. I dedicate this compilation in their lotus feet with all humility seeking their blessings.

I sincerely thank Sri Periasamy of Tiruchi and M/s Maruthy Laser Printers, who did the computerization, and M/s R.S.T.Printers, who got this beautifully printed.

Though every effort has been taken in compiling the above material and getting them printed, some errors / omissions / mistakes could have crept in, due to ignorance, oblivion and lack of efforts and I humbly request the Vedic Pandits who go through this Anubandha, to kindly intimate such things to me for rectification.

**S.Kulathu Hariharaputra Sarma**

# कृष्ण यजुर्वेद तैत्तिरीय शाखाऽनुबन्धः


| विषयः | | पृष्ठ संख्या |
|---|---|---|
| १. | तैत्तिरीय संहिता ब्राह्मण आरण्यक मन्त्र प्रश्नानां विषयानुक्रमणिका | |
| | तैत्तिरीय संहिता | १ |
| | तैत्तिरीय ब्राह्मणम् | ४२ |
| | तैत्तिरीय आरण्यकम् | ६२ |
| | मन्त्रप्रश्नः | ७६ |
| २. | याज्या पुरोनुवाक्या संग्रहः | ८२ |
| ३. | प्रतीक मन्त्राणां अनुक्रमणिका | १३८ |
| ४. | प्रतीक मन्त्राणां अकारादि अनुक्रमणिका | १४७ |
| ५. | प्लुत रङ्ग प्लुत स्वराः | १५७ |
| ६. | एकस्मिन् पदे द्विरुक्तिः (आम्रेडितम्) | १६१ |
| ७. | तैत्तिरीय संहिता ब्राह्मण आरण्यक मन्त्र प्रश्नानां अनुवाक अनुक्रमणिका | १६७ |
| ८. | तैत्तिरीय ब्राह्मण आरण्यक मन्त्र प्रश्नानां अनुवाक अकारादि अनुक्रमणिका | १८९ |
| ९. | तैत्तिरीय ब्राह्मण आरण्यक मन्त्र प्रश्नान्तर्गत मन्त्र विभागानां अनुक्रमणिका | १९९ |
| १०. | तैत्तिरीय ब्राह्मण आरण्यक मन्त्र प्रश्नान्तर्गत मन्त्र विभागानां प्रश्न, अनुवाक क्रमं अनुसृत्य अकारादि अनुक्रमणिका | २९३ |


***

# १. कृष्ण यजुर्वेद तैत्तिरीय संहिता विषयानुक्रमणिका

| का.प्र.अ[1] | मन्त्रारंभः | विषयः, टिप्पणी |
|---|---|---|
| **प्रथम काण्डे** | **प्रथमः प्रश्नः** | **दर्शपूर्णमासौ (ब्राह्मणं-तै.ब्रा.३-२,३)** |
| १-१-१ | इ॒षे त्वो॒र्जेत्वा᳚ | वत्सापाकरणम् (ब्राह्मण भागः ब्रा.३-२-१) |
| १-१-२ | य॒ज्ञस्य॑ घो॒षद॑सि | बर्हिराहरणम् (ब्रा.३-२-२) |
| १-१-३ | शुन्ध॑ध्वं॒ दैव्या॑य॒ कर्म॑णे | रात्रि दोहः (ब्रा.३-२-३) |
| १-१-४ | कर्म॑णे वां दे॒वेभ्य॑ः | व्रीहिनिर्वापः (ब्रा.३-२-४) |
| १-१-५ | दे॒वो व॑ः सवि॒तोत्पु॑नातु | व्रीह्यवघातः (ब्रा.३-२-५) (ब्रा.३-२-६ अपि पश्यत) |
| १-१-६ | अव॑धूत॒ꣳ रक्षोऽव॑धूताः | व्रीहिपेषणम् (ब्रा.३-२-६) |
| १-१-७ | धृष्टि॑रसि॒ ब्रह्म॑ यच्छ | कपालोपधानम् (ब्रा.३-२-७) |
| १-१-८ | संव॑पामि॒ समाप॑ः | पुरोडाश श्रपणम् (ब्रा.३-२-८) |
| १-१-९ | आद॑द॒ इन्द्र॑स्य | वेदिकरणम् (ब्रा.३-२-९) |
| १-१-१० | प्रत्यु॑ष्ट॒ꣳ रक्ष॒ः प्रत्यु॑ष्टाः | हविर्ग्रहणम् (ब्रा.३-३-१-४,१०) |
| १-१-११ | कृष्णो᳚ऽस्याखरे॒ष्ठः | इध्मा बर्हिः पूर्वकं वेद्यां हविरासादनम् (ब्रा.३-३-६) |
| १-१-१२ | भुव॑नमसि॒ विप्र॑थस्व | आघारः (ब्रा.३-३-७) |
| १-१-१३ | वाज॑स्य मा प्रस॒वेन॑ | स्रुग्व्यूहनाद्युत्तर तन्त्रम् (ब्रा.३-३-९) |
| १-१-१४ | उ॒भा वा॑मिन्द्राग्नी | काम्येष्टि याज्या पुरोऽनुवाक्याः (ब्राह्मणं.सं.२-२-१, २-२-२) |
| **प्रथम काण्डे** | **द्वितीयः प्रश्नः** | **अग्निष्टोमे क्रयः (ब्राह्मणं-तै.सं.६-१, ६-२)** |
| १-२-१ | आप॑ उन्दन्तु जी॒वसे᳚ | यजमानस्य क्षौर स्नानानुलेपनादि संस्काराः प्राचीन वंश प्रवेशश्च (ब्रा. सं. ६-१-१) |
| १-२-२ | आकू᳚त्यै प्र॒युजे॒ऽग्नये॒ स्वाहा᳚ | यजमानस्य दीक्षा (ब्रा. सं. ६-१-२,३,४) |

[1] काण्ड, प्रश्न,अनुवाक संख्या

| | | |
|---|---|---|
| १-२-३ | दैवीं॒ धियं॑ मनामहे | देवयजन स्वीकारः (ब्रा. सं. ६-१-४) |
| १-२-४ | इ॒यं ते॑ शुक्र त॒नूः | सोमक्रयण्यानयनम् (ब्रा. सं. ६-१-७) |
| १-२-५ | वस्व्य॑सि रु॒द्राऽसि॑ | सोमक्रयण्याः पद संग्रहः (ब्रा. सं. ६-१-८) |
| १-२-६ | अ॒ꣳशुना॑ ते अ॒ꣳशुः | सोमोन्मानम् (ब्रा. सं. ६-१-९) |
| १-२-७ | सोमं॑ ते क्रीणामि | सोमक्रयणम् (ब्रा. सं. ६-१-१०,११) |
| १-२-८ | उदायु॑षा स्वा॒युषा॑ | सोमस्य शकटारोपणम् (ब्रा. सं. ६-१-११) |
| १-२-९ | प्रच्य॑वस्व भुवस्पते | सोमस्य प्राचीनवंशं प्रति गमनम्। (ब्रा. सं. ६-१-११) |
| १-२-१० | अ॒ग्नेरा॑ति॒थ्यम॑सि | आतिथ्येष्टिः (ब्रा. सं. ६-२-१,२) |
| १-२-११ | अ॒ꣳशुर॑ꣳशुस्ते देवसोम | उपसदः (ब्रा. सं. ६-२-२,३,४) |
| १-२-१२ | वि॒त्ताय॑नी मेऽसि | उत्तर वेदि निर्माणम् (ब्रा. सं. ६-२-७,८) |
| १-२-१३ | यु॒ञ्ज॒ते मन॑ उ॒त यु॑ञ्जते | हविर्धान मण्डप निर्माणम् (ब्रा. सं. ६-२-९) |
| १-२-१४ | कृ॒णु॒ष्व पाजः॒ प्रसि॑तिं | काम्याः सामिधेन्यः, पुरोऽनुवाक्या याज्याश्च ॥ (ब्रा. सं. २-२-२) |

(बोधायन प्रोक्ते उदक शान्ति, प्रतिसर मन्त्र जपे विनियुज्यते)

---

## प्रथम काण्डे तृतीयः प्रश्नः　　अग्निष्टोमे पशुः (ब्राह्मणं-तै.सं.(६-२-१०) –(६-४-३)

| | | |
|---|---|---|
| १-३-१ | दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे | सदोमण्डप निर्माणम् (ब्रा. सं. ६-२-१०) |
| १-३-२ | र॒क्षो॒हणो॑ वलग॒हनो॑ वैष्ण॒वान् | उपरव निर्माणम् (ब्रा. सं. ६-२-११) |
| १-३-३ | वि॒भूर॑सि प्र॒वाह॑णः | धिष्णियाः (ब्रा. सं. ६-३-१) |
| १-३-४ | त्वꣳ सो॑म तनू॒कृद्भ्यः॑ | वैसर्जनीयहोमः (ब्रा. सं. ६-३-२) |
| १-३-५ | अत्य॒न्यानगा॒ं नान्यानुपा॑गां | यूपच्छेदनम् (ब्रा. सं. ६-३-३) |
| १-३-६ | पृ॒थि॒व्यै त्वा॒ऽन्तरि॑क्षाय त्वा | यूपस्थापनम् (ब्रा. सं. ६-३-४) |
| १-३-७ | इ॒षेत्वोप॒ वीर॑सि | पशोरुपाकरणम् (ब्रा. सं. ६-३-५,६) |
| १-३-८ | आद॑द ऋ॒तस्य॑ त्वा | उपाकृतस्य पशोर्विशसनम् (ब्रा. सं. ६-३-६,७,८) |
| १-३-९ | वाक्त॒ आप्या॑यतां | संज्ञपितस्य पशोर्वपोत्खेदनम् (ब्रा.सं. ६-३-९) |
| १-३-१० | सं ते॒ मन॑सा॒ मनः॑ | वसाहोमः (ब्रा. सं. ६-३-१०,११) |

| | | |
|---|---|---|
| १-३-११ | स॒मु॒द्रं ग॑च्छ॒ स्वाहा᳚ | गुदकाण्ड होमः (ब्रा. सं. ६-४-१) |
| १-३-१२ | ह॒विष्म॑तीरि॒मा आप॑ः | वसतीवरी संज्ञकानां अपां उपादानम् (ब्रा. सं. ६-४-२) |
| १-३-१३ | हृ॒दे त्वा॒ मन॑से त्वा | सोमस्य शकटादुपावरोहः (ब्रा. सं. ६-४-३) |
| १-३-१४ | त्वम॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वः | काम्य याज्या पुरोऽनुवाक्याः। (ब्रा. सं. २-२-२,३,४) |

## प्रथम काण्डे चतुर्थः प्रश्नः सुत्यादिने कर्तव्या ग्रहाः (ब्राह्मणं-तै.सं.(६-४-४) -(६-६-३)

| | | |
|---|---|---|
| १-४-१ | आद॑दे॒ ग्रावा॑सि | सोमाभिषवः (ब्रा. सं. ६-४-४) |
| १-४-२ | वा॒चस्पत॑ये पवस्व वाजिन् | उपांशु ग्रहः (ब्रा. सं. ६-४-५) |
| १-४-३ | उ॒प॒या॒म गृ॑हीतोऽसि | अन्तर्याम ग्रहः (ब्रा. सं. ६-४-६) |
| १-४-४ | आ वा॑यो भूष शुचिपाः | ऐन्द्र वायव ग्रहः (ब्रा. सं. ६-४-७) |
| १-४-५ | अ॒यं वा᳚ मित्रावरुणा | मैत्रावरुणग्रहः (ब्रा. सं. ६-४-८) |
| १-४-६ | या वा॒ं कशा॒ मधु॑मती | आश्विन ग्रहः (ब्रा. सं. ६-४-९) |
| १-४-७ | प्रा॒त॒र्युजौ॒ विमु॑च्येथां | आश्विन ग्रहः (ब्रा. सं. ६-४-९) |
| १-४-८ | अ॒यं वे॒न श्चो॑दयत् | शुक्रग्रहः (ब्रा. सं. ६-४-१०) |
| १-४-९ | तं प्र॒त्नथा॑ पू॒र्वथा᳚ | मन्थिग्रहः (ब्रा. सं. ६-४-१०) |
| १-४-१० | ये दे॑वा दि॒व्येका॑दश॒ स्थ | आग्रयण ग्रहः (ब्रा. सं. ६-४-११) |
| १-४-११ | त्रि॒ꣳ॒ शत्त्रय॑श्च ग॒णिन॑ः | भ्रातृव्यवत आग्रयण ग्रहः (ब्रा. सं. ६-४-११) |
| १-४-१२ | उ॒प॒या॒म गृ॑हीतो॒सीन्द्रा॑य त्वा | उक्थ्यग्रहः (ब्रा. सं. ६-५-१) |
| १-४-१३ | मू॒र्धानं॑ दि॒वो अ॑र॒तिं | ध्रुवग्रहः (ब्रा. सं. ६-५-२) |
| १-४-१४ | मधु॑श्च॒ माध॑वश्च | ऋतु ग्रहाः (ब्रा. सं. ६-५-३) |
| १-४-१५ | इन्द्रा᳚ग्नी॒ आ ग॑तं | ऐन्द्राग्न ग्रहः (ब्रा. सं. ६-५-४) |
| १-४-१६ | ओमा॑सश्चर्॒षणीधृतः | वैश्वदेव ग्रहः (ब्रा. सं. ६-५-४) |
| १-४-१७ | म॒रुत्व॑न्तं वृष॒भं वा॑वृधा॒नं | पूर्वो मरुत्वतीय ग्रहः (ब्रा. सं. ६-५-५) |
| १-४-१८ | इन्द्र॑ मरुत्व इ॒ह पा॑हि | उत्तर मरुत्वतीयग्रहः (ब्रा. सं. ६-५-५) |
| १-४-१९ | म॒रुत्वा॒ꣳ॒ इन्द्र वृष॒भः | तृतीय मरुत्वतीयग्रहः (ब्रा. सं. ६-५-५) |

| | | |
|---|---|---|
| १-४-२० | महा९ इन्द्रो य ओजसा | माहेन्द्र ग्रहः (ब्रा. सं. ६-५-५) |
| १-४-२१ | महा९ इन्द्रो नृवदा | माहेन्द्र ग्रहः (ब्रा. सं. ६-५-५) |
| १-४-२२ | कदाचन स्तरीरसि | आदित्य ग्रहः (ब्रा. सं. ६-५-६) |
| १-४-२३ | वाममद्य सवितः | सावित्र ग्रहः (ब्रा. सं. ६-५-७) |
| १-४-२४ | अदब्धेभिः सवितः | सावित्र ग्रहः (ब्रा. सं. ६-५-७) |
| १-४-२५ | हिरण्यपाणिमूतये | सावित्र ग्रहः (ब्रा. सं. ६-५-७) |
| १-४-२६ | सुशर्मासि सुप्रतिष्ठानः | वैश्वदेवग्रहः (ब्रा. सं. ६-५-७) |
| १-४-२७ | बृहस्पतिं सुतस्य त इन्दो | पात्नीवत ग्रहः (ब्रा. सं. ६-५-८) (ब्रा. सं. ६-६-६ अपि पश्यत) |
| १-४-२८ | हरिरसि हारियोजनः | हारियोजन ग्रहः (ब्रा. सं. ६-५-९) |
| १-४-२९ | अग्न आयू९षि पवसे | आग्नेयोऽतिग्रहः अतिग्राह्यविधानं (ब्रा. सं. ६-६-८) |
| १-४-३० | उत्तिष्ठन्नोजसा सह | ऐन्द्रोऽतिग्रहः अतिग्राह्यविधानं (ब्रा. सं. ६-६-८) |
| १-४-३१ | तरणिर्विश्वदर्शतः | सौर्योऽतिग्रहः अतिग्राह्यविधानं (ब्रा. सं. ६-६-८) |
| १-४-३२ | आप्यायस्व मदिन्तम | संगाहनम् |
| १-४-३३ | ईयुष्टे ये पूर्वतरां | अवगाहनम् |
| १-४-३४ | ज्योतिष्मतीं त्वा सादयामि | ओषणम् |
| १-४-३५ | प्रयासाय स्वाहा | स्रुवाहुतयः |
| १-४-३६ | चित्त९ संतानेन भवं यक्ना | राजगवीहोमः |

(अनुवाकाः ३१-३६ तैत्तिरीयारण्यके तृतीय प्रश्ने षोडशानुवाकमारभ्य वर्तन्ते, तत्रैव व्याख्याताः)

| | | |
|---|---|---|
| १-४-३७ | आतिष्ठ वृत्रहन् | षोडशिग्रहः (ब्रा. सं. ६-६-११) |
| १-४-३८ | इन्द्रमिद्धरी वहतः | षोडशिग्रहः (ब्रा. सं. ६-६-११) |
| १-४-३९ | असावि सोम इन्द्र ते | षोडशिग्रहः (ब्रा. सं. ६-६-११) |
| १-४-४० | सर्वस्य प्रति शीवरी | षोडशिग्रहः (ब्रा. सं. ६-६-११) |
| १-४-४१ | महा ९ इन्द्रो वज्रबाहुः | षोडशिग्रहः (ब्रा. सं. ६-६-११) |
| १-४-४२ | सजोषा इन्द्र सगणः | षोडशिग्रहः (ब्रा. सं. ६-६-११) |

(४१, ४२ - बोधायन प्रोक्ते उदक शान्ति जपे विनियुज्यते)

| | | |
|---|---|---|
| १-४-४३ | उदुत्यं जातवेदसं | दक्षिणा (ब्रा. सं. ६-६-१) |
| १-४-४४ | धाता रातिः संवितेदं | समिष्ट यजुर्होमः (ब्रा. सं. ६-६-२) |
| १-४-४५ | उरुꣳ हि राजा | अवभृथः (ब्रा. सं. ६-६-३) |
| १-४-४६ | यस्त्वा हृदा कीरिणा | काम्य याज्या पुरोऽनुवाक्याः (ब्रा. सं. २-२-४) |

**प्रथम काण्डे पञ्चमः प्रश्नः** — **पुनराधानम्**

| | | |
|---|---|---|
| १-५-१ | देवासुराः संयत्ता आसन् | पुनराधान विधानम् |
| १-५-२ | परा वा एष यज्ञं | याज्याद्यङ्ग जात विधानम् |
| १-५-३ | भूमिर्भूम्ना द्यौर्वरिणा | पुनराधान मन्त्राः (ब्रा. सं. १-५-४) |
| १-५-४ | भूमिर्भूम्ना द्यौर्वरिणेत्याह | पूर्वोक्त मन्त्राणां व्याख्यानम् (मन्त्रभागः सं. १-५-३) |
| १-५-५ | उपप्रयन्तो अध्वरं | आहवनीयोपस्थानम् (ब्रा. सं. १-५-७) |
| १-५-६ | संपश्यामि प्रजा अहं | गार्हपत्यस्य पुनरपि आहवनीयस्य चोपस्थानम् (ब्रा. सं.१-५-८) |
| १-५-७ | अयज्ञो वा एषः | पंचमानुवाकोक्त मन्त्राणां व्याख्यानम् (मन्त्र भागः सं.१-५-५) |
| १-५-८ | संपश्यामि प्रजा अहमित्याह | षष्ठानुवाकोक्त मन्त्राणां व्याख्यानम् (मन्त्र भागः सं. १-५-६) |
| १-५-९ | अग्निहोत्रं जुहोति यदेव | पूर्वोक्तोपस्थानस्य अग्निहोत्राङ्गता |
| १-५-१० | मम नाम प्रथमं जातवेदः | प्रवत्स्यतो यजमानस्य अग्नेरुपस्थानमन्त्राः, आचमनम्, कपालानुमन्त्रणादि च ॥ |
| १-५-११ | वैश्वानरो न ऊत्या | काम्या याज्या पुरोऽनुवाक्याः (ब्रा.सं. २-२-५,६) |

**प्रथम काण्डे षष्ठः प्रश्नः** — **याजमान काण्डम्**

| | | |
|---|---|---|
| १-६-१ | सं त्वा सिञ्चामि यजुषा | आज्यग्रहणानु मन्त्रणम् । |
| १-६-२ | ध्रुवोऽसि ध्रुवोऽहं | हविर्ग्रहणानुमन्त्रणम् (ब्रा. सं. १-६-१०) |
| १-६-३ | अग्निर्मा दुरिष्टात्पातु | इडाभागाद्यनुमन्त्रणम् (ब्रा. सं. १-७-१, सं.१-७-३) |
| १-६-४ | बर्हिषोऽहं देवयज्यया | अनुयाजादीनां अनुमन्त्रणम् । (ब्रा.सं. १-७-४) |
| १-६-५ | आप्यायतां ध्रुवा घृतेन | ध्रुवाप्यायनादि (ब्रा.सं. १-७-५) |

| | | |
|---|---|---|
| १-६-६ | अग॑न्म सु॒व॒स्सुव॑रगन्म | सूर्योपस्थानादि (ब्रा.सं. १-७-६) |
| १-६-७ | यथा॒ वै स॑मृतसो॒माः | देवता परिग्रहादिविधिः । |
| १-६-८ | यो वै श्र॒द्धामना॑रभ्य | यज्ञायुध संभृतिः । |
| १-६-९ | प्र॒जाप॑तिर्य॒ज्ञान॑सृजत | द्वादश द्वंद्व संपत्तिः । |
| १-६-१० | ध्रु॒वोऽसि ध्रु॒वोऽहꣳ सजा॒तेषु॑ | हविः सादनम् (मन्त्र भागः सं. १-६-२) |
| १-६-११ | यो वै स॑प्तद॒शं प्र॒जाप॑तिं | आश्रावणादि मन्त्रविधानम् (सं. ३-३-७-२ पश्यत) (मन्त्र भागः सं. १-६-२-१५) |
| १-६-१२ | इन्द्रं॑ वो वि॒श्वत॒स्परि॑ | काम्या याज्या पुरोऽनुवाक्याः (ब्रा.सं. २-२-७) |

(बोधायन प्रोक्ते उदक शान्ति जपे विनियुज्यते)

---

**प्रथम काण्डे सप्तमः प्रश्नः** **याजमान काण्डम्**

| | | |
|---|---|---|
| १-७-१ | पा॒क॒य॒ज्ञं वा अन्वाहि॑ताग्नेः | इडानुमन्त्रण मन्त्र ब्राह्मणम् (मन्त्र भागः सं. १-६-३) |
| १-७-२ | सꣳश्र॑वा ह सौमन॒सः | सꣳ श्रवस्तुमिश्रयोः प्रश्नोत्तराभ्यां इडा प्रशंसनम् । |
| १-७-३ | प॒रोक्षं॒ वा अ॒न्ये दे॒वाः | अन्वाहार्यः । (मन्त्र भागः सं. १-६-३) |
| १-७-४ | ब॒र्॒हिषो॒ऽहं दे॒व य॒ज्यया॑ प्र॒जावा॑न्भूयास॒मित्या॑ह | शेषाहुतीनां अनुमन्त्रण मन्त्र व्याख्यानम् (मन्त्र भागः सं. १-६-४) |
| १-७-५ | ध्रु॒वां वै रिच्य॑मानां | आप्यायनादि मन्त्र व्याख्यानम् (मन्त्र भागः सं.१-६-५) |
| १-७-६ | अग॑न्म सु॒व॒स्सुव॑रग॒न्मेत्या॑ह | उपस्थानादि मन्त्र व्याख्यानम् (मन्त्र भागः सं. १-६-६) |

१-७-७ प्रारभ्य १-७-१२ पर्यन्तं षट् अनुवाकाः वाजपेय मन्त्राः ।

तेषां ब्राह्मणं तै.ब्रा.१-३-५——१-३-९ पर्यन्तं वर्तते ॥

| | | |
|---|---|---|
| १-७-७ | देव॑सवित॒ः प्रसु॑व य॒ज्ञं | वाजपेयाध्वर्यवे रथ संस्काराः (ब्रा.तै.ब्रा. १-३-५) |
| १-७-८ | दे॒वस्या॒हꣳ स॑वि॒तुः प्र॑स॒वे | रथधावनम् (ब्रा.तै.ब्रा. १-३-६) |
| १-७-९ | क्ष॒त्रस्योल्ब॑मसि | यूपारोहणम् (ब्रा.तै.ब्रा. १-३-७) |

वाजश्च प्रसवश्च (१२) द्वादश वाजप्रसवीयानि जुहोति।
आयुर्यज्ञेन कल्पतां (१०) दशभिः कल्पैरोहति। (ब्रा. १-३-७-७,८)

१-७-१० वाजस्येमं प्रसवः सुषुवे — अन्नहोमाः अभिषेकश्च (ब्रा.तै.ब्रा. १-३-८)

(ग्राम्याणां ओषधीनां मन्त्राः अत्र उच्यन्ते। आरण्यानां मन्त्राः सं ४-७-१२ अनुवाके उच्यन्ते)

१-७-११ अग्निरेकाक्षरेण वाचमुदजयत् — उज्जितीः

१-७-१२ उपयाम गृहीतोऽसि नृषदं — अतिग्राह्याः (ब्रा.तै.ब्रा. १-३-९)

१-७-१३ अन्वह मासा अन्विद्वनानि — काम्य याज्या पुरोनुवाक्याः (ब्रा.तै.ब्रा. २-२-८)

---

## प्रथम काण्डे अष्टमः प्रश्नः राजसूयः। (अस्य ब्राह्मणम् तै.ब्रा. (१-६)-(१-८) पर्यन्तम्)

१-८-१ अनुमत्यै पुरोडाशमष्टाकपालं — अनुमतादि भागाः नैर्ऋत मन्त्राश्च। (ब्रा. १-६-१)

१-८-२ आग्नेयमष्टाकपालं निर्वपति — चातुर्मास्येषु प्रथमं वैश्वदेव पर्व। (ब्रा. १-६-२)
अस्मिन् याज्यापुरोऽनुवाक्याः सं ४-१-११-(१-२०)

१-८-३ ऐन्द्राग्नमेकादश कपालं — द्वितीयं वरुण प्रघास पर्व। (ब्रा. १-६-४,५)
(याज्या पुरोनुवाक्याः सं. ४-२-११-(१-१४))

१-८-४ अग्नयेऽनीकवते पुरोडाशं — तृतीयं साकमेध पर्व (ब्रा. १-६-६,७)
(याज्या पुरोनुवाक्याः सं. ४-३-१३-(१-३३))

१-८-५ सोमाय पितृमते पुरोडाशं — महा पितृ यज्ञः (ब्रा. १-६-८,९)

(याज्या पुरोनुवाक्याः सं. २-६-१२-(१-१७)) (सौत्रामणी ब्रा. २-६-१६ अपि पश्यत)

१-८-६ प्रतिपूरुषमेककपालान्निर्वपति — त्र्यंबक पुरोडाशाः (ब्रा. १-६-१०)

१-८-७ ऐन्द्राग्नं द्वादशकपालं — सुनासीर्यं, इन्द्र तुरीयं, पंचेध्मीय मन्त्राः, अपामार्ग होम मन्त्राश्च (ब्रा. १-७-१)

(ये देवाः पुरः सद इत्यादि मन्त्राः बोधायन प्रोक्ते उदक शान्ति जपे विनियुज्यन्ते ॥)

१-८-८ धात्रे पुरोडाशं द्वादश कपालं — देविकादि कर्म षट्कम् (ब्रा. १-७-२)

(याज्या पुरोनुवाक्याः सं. ३-३-११-(७-२०))(सं. ३-४-९-'देविका निर्वपेत्' अपि पश्यत)

१-८-९ बार्हस्पत्यं चरुं निर्वपति — रत्निनां हवींषि, अभिषेचनीयस्य दीक्षणीया च (ब्रा.१-७-३)

| | | |
|---|---|---|
| १-८-१० | अ॒ग्नये॑ गृ॒हप॑तये पुरो॒डाश॑ं | देवसुवां हवींषि (ब्रा. १-७-४)<br>(याज्या पुरोनुवाक्याः सं. ३-४-११-(१-२०)) |
| १-८-११ | अ॒र्थेत॑ः स्था॒ऽपां पति॑रसि | अभिषेक जलग्रहणम् (ब्रा. १-७-५) |
| १-८-१२ | देवी॑राप॒ः सं मधु॑मतीः | अभिषेक जल संस्कारः (ब्रा. १-७-६) |
| १-८-१३ | स॒मिध॒माति॑ष्ठ गाय॒त्री त्वा॑ | दिग्व्यास्थापनम् (ब्रा.१.७.७) |
| १-८-१४ | सोम॑स्य॒ त्विषि॑रसि | अभिषेकः (ब्रा. १-७-८) |
| १-८-१५ | इन्द्र॑स्य॒ वज्रो॑ऽसि॒ वार्त्र॑घ्नः | रथेन दिग्विजयः (ब्रा. १-७-९) |
| १-८-१६ | मि॒त्रो॑ऽसि॒ वरु॑णोऽसि | जितवतः राज्ञः सेवोपचारः (ब्रा. १-७-१०) |
| १-८-१७ | आ॒ग्ने॒यम॒ष्टाक॑पाल॒ं निर्व॑पति | संसृपां हवींषि (ब्रा. १-८-१) |
| १-८-१८ | स॒द्यो दी॑क्षयन्ति स॒द्यः सोम॑ं | दशपेयः (ब्रा. १-८-२) |
| १-८-१९ | आ॒ग्ने॒यम॒ष्टाक॑पाल॒ं निर्व॑पति | दिशामवेष्टयः, पशुद्वय बन्धः, सात्य दूतानां<br>हवींषि च (ब्रा. १-८-३) |

अ॒श्विभ्या॑ं पू॒ष्णे - अस्य याज्यानुवाक्ये अश्वि॑ना य॒ज्ञं, इ॒मं य॒ज्ञं।
सर॑स्वते सत्य॒वाचे॑ - अस्य याज्यानुवाक्ये प्रते॑ म॒हे, इदं ते॑ ह॒व्यं। ब्रा. २-५-४ (१२ – १५) पश्यत।

| | | |
|---|---|---|
| १-८-२० | आ॒ग्ने॒यम॒ष्टाक॑पाल॒ं निर्व॑पति | प्रयुजां हवींषि (ब्रा. १-८-४) |
| १-८-२१ | स्वा॒द्वीं त्वा॑ स्वा॒दुना॑ | सौत्रामणी (ब्रा. १-८-५,६) |

(सौत्रामणी – ब्रा. २-६- अनुवाक षट्कं आध्वर्यवम्, अवशिष्टैः चतुर्दशभिः अनुवाकैः हौत्रं उक्तम्)

| | | |
|---|---|---|
| १-८-२२ | अग्ना॑विष्णू॒ महि॒ तद्वा॑ं | काम्य याज्या पुरोऽनु वाक्याः (ब्रा. २-२-९,२०) |

| का.प्र.अ | मन्त्रारंभः | विषयः, टिप्पणी |
|---|---|---|

**द्वितीय काण्डे प्रथमः प्रश्नः पशुविधानम्**

अस्य प्रश्नस्य मन्त्र भागः तै.ब्रा. २-८ (पीवोन्नाꣳ..) प्रथमानुवाकमारभ्य सप्तमानुवाक पर्यन्तं वर्तते ॥

२-१-१ वायव्यꣳ श्वेतमालभेत भूतिकामः (मं.भागः - ब्रा.२-८-१)
१-६ भूति-ग्राम-प्रजाकामस्य आमयाविनश्च, ७-९ प्रजाकामस्य, १०-पशुकामस्य च पशवः ।

२-१-२ प्रजापतिः प्रजा असृजत (मं. भागः - ब्रा. २-८-१,२,३)
१-४ जलोदर गृहीतस्य, ५-पशुप्रजाकामस्य, ६-१० ब्रह्मवर्चस कामस्य,
११-१२ विद्वत्सभा जयार्थिनः, १३-१६ तीव्ररोग सहितस्य, प्रजाकामस्य, विदुषो जनानुरागार्थिनः, पौरोहित्य स्पर्धावतश्च पशुविधानम् ।

२-१-३ देवासुरा एषु लोकेष्वस्पर्धन्त (मं. भागः - ब्रा. २-८-३,४)
१-३ स्पर्धमानस्य, ४ संग्रामार्थिनः, ५-७ ग्राम कामस्य, ८,९ अन्नकामस्य ,
१० राज्यकामस्य, ११ पुनः प्रतिष्ठाकामस्य, १२ पापक्षयार्थिनः, १३ राज्यार्थिनश्च पशुविधानम्

२-१-४ असावादित्यो न व्यरोचत (मं.भागः - ब्रा. २-८-४)
१-७ ब्रह्मवर्चसकामस्य, ८ त्वग्दोष निवारणार्थिनः, ९-१० भ्रातृव्यवतः,
११ पाप विमुक्ति कामस्य, १३-१५ भ्रष्ट राज्यस्य च पशुविधानम् ।
ब्रा. २-४-७ (४-७) उपहोमार्थाः यः सुशृंगः।

२-१-५ इन्द्रो वलस्य बिलमपौर्णोत् (मं भागः - ब्रा. २-८-४,५)
१-५ पशुकामस्य, ६ प्रजाकामस्य, ७-८ भूतिकामस्य, ९-११ विच्छिन्नसोम पीथस्य,
१२-१६ अभिचरतश्च पशवः ।

२-१-६ बार्हस्पत्यꣳ शितिपृष्ठमालभेत (मं. भागः - ब्रा. २-८-५,६)
१-२ ग्रामकामस्य समानेषूच्चत्वकामस्य च, ३-६ अन्नकामस्य, ७-८ इन्द्रियकामस्य,
९-१० परकर्तृक (स्वप्रतिग्रहीतृक) दानकामस्य, ११-१२ अन्नकामस्य, १३-१४ ग्राम कामस्य, १५-१६ अज्ञात चिर रोग ग्रस्तस्य च पशवः ।

२-१-७ वषट् कारो वै गायत्रियै शिरोऽच्छिनत् (मं. भागः - ब्रा. २-८-६)

१-३ ब्रह्मवर्चसकामस्य, ४ वृष्टिकामस्य, ५ प्रजाकामस्य ६ अन्नकामस्य, ७ ग्रामकामस्य, ८-९ ब्रह्मवर्चसकामस्य, १०-११ अभिचरतश्च पशवः ।

२-१-८ असावादित्यो न व्यरोचत (मं. भागः - ब्रा. २-८-७)

१-३ ब्रह्मवर्चसकामस्य, ४-७ अभिचरतः, ८ महायज्ञ प्राप्ति कामस्य, ९-१० पशुकामस्य, ११-१२ समय (प्रतिज्ञा पूर्तिसन्धि) कामस्य, १३-१४ वृष्टिकामस्य च पशवः ।

२-१-९ वरुण ँ सुषुवाणमन्नाद्यं नोपानमत्

१-२ अन्नाद्यकामस्य, ३-५ अन्नकामस्य, ६ दीर्घरोगिणः, ७-८ पुष्टिकामस्य च पशुविधानम्

२-१-१० आश्विनं धूम्रललाममालभेत (मं. भागः - ब्रा. २-८-७)

१ दुर्ब्राह्मणस्य सोमपिपासोः, २ मृषाभिशस्तस्य, ३ आश्विन शस्त्रकाले सूर्यानाविर्भाववतश्च पशवः ।

२-१-११ इन्द्रं वो विश्वतस्परीन्द्रं नरः काम्येष्टि याज्या पुरोऽनुवाक्याः ।
ब्रा. सं. २-२-११. २-३-

---

## द्वितीय काण्डे द्वितीयः प्रश्नः इष्टि विधानम्

२-२-१ प्रजापतिः प्रजा असृजत (मं. भागः - सं. १-१-१४-(१-८))

१-२ प्रजाकामस्य. ३ स्पर्धमानस्य, ४ संग्राममुपप्रयास्यतः ५ जितशत्रोः, ६-७ सभामेष्यतः, ८-९ सभां प्राप्तस्य च पुरोडाशाश्चरवश्च ।

२-२-२ अग्नये पथिकृते पुरोडाश"-
(मं.भागः -सं.१-१-१४(९-१४),१-२-१४, १-३-१४(१-६))

१ आहिताग्नेः दर्शपूर्णमासातिक्रमे, २ अव्रत्याचरणे, ३-४ पिशाच ग्रह बाधायां, ५ अभिचरतः, ६ गोपुरुषमृत्यु तद्भयवतः, ७ युयुत्सोः, ८ अपमृत्यु भीतस्य, ९ गृहदाहे च पुरोडाशाः ।

२-२-३ अ॒ग्नये॒ कामा॑य पुरो॒डाशं॑ (मं. भागः - सं. १-३-१४-(७-२०)
१ कामोपनमनेच्छोः, २ क्षेत्रादौ स्पर्धमानस्य, ३ अभिचर्यमाणस्य, ४ सर्वायुः प्राप्ति कामस्य, ५ भूतिकामस्य, ६ कान्ति कामस्य, ७ तेजः कामस्य, ८ पराभिभवेच्छोश्च पुरोडाशाः।

२-२-४ अ॒ग्नयेऽन्न॑वते पुरो॒डाशं॑ (मं. भागः - सं. १-३-१४-(२१-२८), १-४-४६-(१-१४)
१ अन्नवत्वकामस्य, २ अन्नाशन शक्तिकामस्य, ३ अन्नपतित्व कामस्य, ४ दीर्घरोग युक्तस्य, ५ चक्षुष्पाटव कामस्य, ६ पुत्रकामस्य पुरोडाशाः। ७ रसकामस्य चरुः। ८ धनकामस्य, ९ संग्राम जयपूर्वकं अन्नकामस्य, १० द्विरग्न्युद्धरणे, ११-१८ उद्धृताग्नि नाशे पुरोडाशाः।

२-२-५ वै॒श्वा॒न॒रं द्वाद॑शकपालं॒ निर्व॑पेत् (मं. भागः - सं. १-५-११-(१-१६))
१-२ अभिशस्यमानस्य प्रजाकामस्य च पुरोडाश चरवः, ३ पुत्रजन्मवतः, ४-५ दर्शपूर्णमासातिक्रमवतः, ६-७ अग्निमुद्वासयिष्यतः, ८-१३ ग्रामकामस्य पुरोडाशाः।

२-२-६ आ॒दि॒त्यं च॒रुं निर्व॑पेत् संग्रा॒मम॑ुपप्रया॒स्यन्॒ (मं. भागः - सं. १-५-११-(१७-२०))
१ संग्राममुपप्रयास्यतश्चरुः, २ संग्रामभूमिं प्राप्तस्य, ३ विद्विषतोरन्नं जग्धवतः, ४ शपथं कृत्वा द्रुह्यतः, ५ अविं प्रतिगृह्णानस्य ६ उभयतोदन्तं प्रति गृह्णानस्य, ७ याचयितुं प्रयास्यतः, ८-९ याचयित्वा प्रत्यागच्छतश्च पुरोडाशाः।

२-२-७ ऐ॒न्द्रं च॒रुं निर्व॑पे॒त्प॒शुका॑मः (मं. भागः - सं. १-६-१२-(१-१९))
१-२ पशुकामस्य चरुः, ३ पशुकामस्य, ४ ब्रह्मवर्चस कामस्य, ५ अन्नकामस्य, ६ भूतिकामस्य, ७ पाप्मना गृहीतस्य, ८ परैः पीडितस्य, ९ बद्धस्य परियत्तस्य वा, १० महायज्ञेच्छोः पुरोडाशाः॥

२-२-८ इन्द्रा॒यान्वृ॑जवे पुरो॒डाशं॑ (मं. भागः - सं. १-७-१३-(१-१४); ब्रा.२-४-२-(१८-१९)
१ ग्रामकामस्य पुरोडाशः, २-३ सेनाकामस्य चरुः, ४ युद्धार्थिनः, ५ नष्ट धैर्यस्य, ६ अन्यकर्तृक दानकामस्य, ७ उत्तमर्णस्य, ८ राज्य भ्रष्टस्य भ्रश्यमानस्य वा, ९-११ अन्य साम्यमनिच्छतः पुरोडाशाः। उपहोम मन्त्राः - ब्रा. २-४-२-(२०-२४)) आ त्वा॑ हार्षम॒न्तर॑भूः---

२-२-९ आग्नावैष्णवमेकादशकपालं निर्वपेत् (मं. भागः - सं. १-८-२२-(१-९))
१ अभिचरतः, २ प्रत्यभिचरतः ३ पराभिचार पीडितस्य च चरु पुरोडाशौ ४ यज्ञोपनतिकामस्य पुरोडाशः, ५-७ चक्षुष्कामस्य चरुः , ८-९ यज्ञकतृ भ्रातृव्यवत इन्द्रिय सामर्थ्याविनाश- कामस्य, १०-११ भ्रातृव्योपाकृत वशा तुल्य फलकामिनः पुरोडाशाः।
( उपहोम मन्त्रा : चक्षुषे हेते ब्रा. २-४-२-(१-९))

२-२-१० असावादित्यो न व्यरोचत (मं. भागः - सं. १-८-२२-(१०-१९))
१-५ ब्रह्मवर्चसकामस्य, ६ चर्मरोग भीतस्य, ७ प्रजाकामस्य, ८ अभिचरतः, ९-१० दीर्घ रोग युतस्य, ११ पुरस्य वैरि जनन कामस्य च चरवः।

२-२-११ ऐन्द्रमेकादश कपालं निर्वपेत् (मं. भागः - सं. २-१-११-(१-१३))
१ ग्रामकामस्य, २ प्रजाराजयोर्विरोधकामस्य, ३ उक्त विरोध समाधानेच्छोः, ४ ग्रामकामस्य पुरोडाशाः, ५ ग्रामकामस्य चरुः ६ समानैरप्रियस्य चरुपुरोडाशाः।
(मं. भागः - ब्रा. २-४-४-(११-१५)) (संगच्छध्व ँ संवदध्वम्...)

२-२-१२ हिरण्यगर्भ आपो ह यत् काम्येष्टि याज्या पुरोऽनुवाक्याः। (ब्राह्मणम् - सं. २-३-२, २-५-५-२, ब्रा. ३-६-१)

---

## द्वितीय काण्डे तृतीयः प्रश्नः इष्टि विधानम्

२-३-१ आदित्येभ्यो भुवद्वद्भ्यश्चरुं निर्वपेत् (मं. भागः - सं. २-१-११-(१४-२२))
१ भूतिकामस्य, २ अपरुद्धस्यापरुध्यमानस्य च चरवः, ३-१३ अपरुध्यमानस्य प्रतिबन्ध तारतम्येन प्रयोग विशेषाः।

२-३-२ देवा वै मृत्योरबिभयुः (मं. भागः - सं. २-२-१२-(१-१४), (२०-२६))
१-६ मृत्यु भीतस्य, ७-९ ब्रह्मवर्चसकामस्य, १० हिरण्यार्थिनः, ११ हिरण्यं लब्धवतश्चोरादि भीतस्य, १२ विनष्ट हिरण्यस्य च इष्टयः, १३-१४ सोमवामिनः चरुः, १६-२० पशुकामस्य त्रिहविष्का इष्टिः।

२-३-३ देवा वै सत्रमासत (मं. भागः - सं. २-३-१४-(१-१८))
१-३ यज्ञ विभ्रष्टस्य, ४ कामितार्थ सिद्ध्यर्थिनः, ५ ब्रह्मवर्चसार्थिनः, ६ क्लैब्याद् बिभ्यतः, ७ ग्रामकामस्य, ८-९ अतिक्रामतो वैश्यस्य वश्यार्थं च चरु पुरोडाशाः।

२-३-४ अर्यम्णे चरुं निर्वपेत् (मं. भागः - सं. २-३-१४-(१९-२५))
१ स्वर्गकामस्य, २ अन्यकर्तृक दानकामस्य, ३ सभां जिगमिषोः, ४-५ अति निकृष्टस्य राजन्यस्य, ६ तथाविधस्य ब्राह्मणस्य च इष्टयः।

२-३-५ प्रजापतेस्त्रयस्त्रिꣳशद् दुहितर आसन् (मं. भागः - सं. २-४-१४-(१-२))
यक्ष्म गृहीतस्येष्टिः।

२-३-६ प्रजापतिर्देवेभ्योऽन्नाद्यं व्यादिशत् (मं. भागः - सं. २-४-१४-(३-५))
अन्नादन शक्तिकामस्य त्रिधातु संज्ञक यागः।

२-३-७ देवासुराः संयत्ता आसन् (मं. भागः - सं. २-४-१४-(६-१०))
वीर्यकामस्य सर्वपृष्ठाख्येष्टिः ९ अभिशस्यमानस्य इयमेवेष्टिः।

२-३-८ रजनो वै कौणेयः (मं. भागः - सं. २-४-१४-(११-१५)) चक्षुष्कामस्येष्टिः।

२-३-९ ध्रुवोसि ध्रुवोहꣳ सजातेषु भूयासं (मन्त्राः ब्राह्मणं च) (सं. २-४-१४-(१६-१७))
ग्रामकामस्य सांग्रहणीष्टिः।

२-३-१० यन्नवमैत् तन्नवनीतमभवत् (ब्रा. सं. २-३-११) आयुष्कामेष्टि मन्त्राः॥
(अग्निरायुष्मानिति पश्च उदकशान्ति जपे, प्रतिसर वन्धे च उपयुज्यन्ते॥)

२-३-११ अग्निं वा एतस्य शरीरं गच्छति (मं. भागः - सं. २-४-१२-(१-१०))
(सं. २-३-१० अपि) आयुरारोग्य कामयोरिष्टिः।

२-३-१२ प्रजापतिर्वरुणायाश्वमनयत् (मं. भागः - सं. २-५-१२-(११-१७))
अश्वदानवतो वारुणीष्टिः।

२-३-१३ यावामिन्द्रावरुणा यतव्या तनूः (मन्त्राः ब्राह्मणं च)
(मं.भागः - सं.२-५-१२-(१८-१९))पाप्मना गृहीतस्येष्टिः।
(बोधायन प्रोक्ते उदक शान्ति जपे विनियुज्यते।)

२-३-१४ स प्रत्नवन्निकाव्येन्द्रं वः काम्या याज्या पुरोऽनुवाक्याः (ब्राह्मणं-सं. २-३-३,४)

---

**द्वितीय काण्डे चतुर्थः प्रश्नः** **इष्टि विधानम्**

२-४-१ देवा मनुष्याः पितरस्ते"ऽन्यतः भ्रातृव्यैः स्पर्धमानस्येष्टिः (मं. भागः - सं.२-५-१२(२४-२९)

२-४-२ देवासुराः संयत्ता आसन् भ्रातृव्यवतः स्पर्धमानस्य विजितीष्टिः
(सं.२-५-१२(३०-३५)

| | | |
|---|---|---|
| २-४-३ | देवासुराः संयत्ता आसन् | भ्रातृव्यवतः स्पर्धमानस्य संवर्गेष्टिः (मन्त्रः, ब्राह्मणम्) |
| २-४-४ | प्रजापतिः प्रजा असृजत | प्रजाकामस्य पशुकामस्य च गार्मुतश्चरुः।<br>(मं. भागः - सं. २-६-११-(२०-२३)) |
| २-४-५ | अग्ने गोभिर्न आ गहि | चित्रायागोपहोम मन्त्राः |
| २-४-६ | चित्रया यजेत पशुकामः | पशुकामस्य चित्राख्यो यागः, सप्त हवींषि<br>(मं. भा.-सं.३-१-११-(१-२३)) |
| २-४-७ | मारुतमसि मरुतामोजः | कारीरीष्टि प्राच्यांग मन्त्राः। (ब्रा - सं. २-४-९) |
| २-४-८ | देवा वसव्या अग्ने सोमसूर्य। | कारीर्युत्तर भाग मन्त्राः। (ब्रा - सं. २-४-१०) |
| २-४-९ | मारुतमसि मरुतामोज इति | कारीरी पूर्वभाग विधानम् (मं. भागः - सं. २-४-७) |
| २-४-१० | देवा वसव्या देवाः शर्मण्याः | कारीर्युत्तर भाग विधानम्।<br>(मं. भागः - सं. २-४-८, ३-१-११-(२५-३५)) |
| २-४-११ | सर्वाणि छन्दा९ँस्येतस्यां | सर्वकामार्थिनः, अभिचरतः, अभिचर्यमाणस्य, सहस्रेण यक्ष्यमाणस्य, बहुविधयज्ञसाधन द्रव्यार्थिनश्च त्रैधातवीष्टिः।<br>(मं. भागः - सं. ३-२-११) |
| २-४-१२ | त्वष्टा हतपुत्रो वीन्द्रं | त्रैधातवीयेष्टेः देवतार्थमाख्यायिका। |
| २-४-१३ | देवा वै राजन्याज्जायमानात् | राजन्यस्य शक्ति स्तंभ निवारकश्चरुः।<br>(मं. भागः - सं. ३-३-११-(१-४)) |
| २-४-१४ | नवोनवो भवति जायमानः | काम्येष्टि याज्या पुरोऽनुवाक्याः।<br>(ब्राह्मणम्-सं. २-३-५,६,७,८,९) |

**द्वितीय काण्डे पञ्चमः प्रश्नः** — **इष्टि विधानम्**

| | | |
|---|---|---|
| २-५-१ | विश्वरूपो वै त्वाष्ट्रः पुरोहितः | विश्वरूप वधाख्यायिका, रजस्वला व्रतानि च। |
| २-५-२ | त्वष्टा हतपुत्रो वीन्द्र९ँ सोमं | पूर्णिमायां अग्नीषोमीय पुरोडाशः। |
| २-५-३ | इन्द्रं वृत्रं जघ्निवा९ँसम् | पौर्णमास्येऽनुनिर्वाप्यो बैमृध पुरोडाशः, अमावास्यायां सांनाय्य दधि यागश्च। |
| २-५-४ | ब्रह्मवादिनो वदन्ति स त्वै | भ्रातृव्यवतः पशुकामस्य च यागौ, सान्नाय्य देवता च। |
| २-५-५ | नासोमयाजी सं नयेत् | अभ्युदयेष्टिः, ५ स्वर्गकामस्य दाक्षायण यज्ञः<br>(मं. भागः - सं. २-२-१२-(१६-१८)) |

| | | |
|---|---|---|
| २-५-६ | एष वै देवरथो यद्दर्शपूर्णमासौ | दर्शपूर्णमासयोः सोमयागेन सह पौर्वापर्यम् । |
| २-५-७ | देवा वै नर्चि न यजुष्यश्रयन्त | सामिधेनी मन्त्र व्याख्यानम् । (मं. भागः - ब्रा. ३-५-१) |
| २-५-८ | अयज्ञो वा एष योऽसामा | द्वितीयादि सामिधेनी मन्त्र व्याख्यानम् । (मं. भागः - ब्रा. ३-५-२) |
| २-५-९ | अग्ने महाँ असीत्याह | प्रवर मन्त्रस्य निगदस्य, ९-१५ स्रुगादापन निगदस्य च व्याख्यानम् । (मं. भागः - ब्रा. ३-५-३,४) |
| २-५-१० | त्रीँस्तृचाननु ब्रूयाद्राजन्यस्य | नैमित्तिक्यः काम्याश्च सामिधेन्यः । |
| २-५-११ | निवीतं मनुष्याणां प्राचीनावीतं | सामिधेनीषु होतुर्नियम विशेषः । ९-२५ आध्वर्यव आघारश्च |
| २-५-१२ | आयुष्ट आयुर्दा अग्ने | काम्येष्टि याज्या पुरोऽनुवाक्याः । (ब्राह्मणं- सं. २-३-११,१२,२-३-१२,१३, ५-७-६, १-५-२, २-४-१, सं. २-४-२) |

**द्वितीय काण्डे षष्ठः प्रश्नः** — **अवशिष्ट कर्माभिधानम्**

| | | |
|---|---|---|
| २-६-१ | समिधो यजति वसन्तं | प्रयाज विधिः |
| २-६-२ | चक्षुषी वा एते यज्ञस्य यदाज्य भागौ | आज्य भागौ, ६ तदीये याज्यानुवाक्ये, ७ -१७ प्रधानस्य हविषो याज्यानुवाक्ये च । (मं. भागः - ब्रा. ३-५-७) |
| २-६-३ | प्रजापतिर्देवेभ्यो यज्ञान् | आग्नेय पुरोडाश विधिः, १०-११ कपालनाशे प्रायश्चित्तं च । |
| २-६-४ | देवस्य त्वा सवितुः प्रसव इति | वेदि निर्माणम् । |
| २-६-५ | ब्रह्मवादिनो वदन्त्यद्भिः | बर्हिः प्रयोगः । |
| २-६-६ | अग्नेस्त्रयो ज्यायाँसो भ्रातरः | उपांशु याजः । ९-१३ स्विष्टकृत् |
| २-६-७ | मनुः पृथिव्या यज्ञियमैच्छत् | इडोपाह्वानम् । (मं. भागः - ब्रा. ३-५-८) |
| २-६-८ | पशवो वा इडा स्वयमादत्ते | इडा भक्षणं, ७-१५ प्राशित्र भक्षणं च । |
| २-६-९ | अग्नीध आदधात्यग्निमुखान् | अनूयाजाः, १२-२२ सूक्तवाकाश्च । (मं. भागः - ब्रा. ३-५-९,१०) |
| २-६-१० | देवा वै यज्ञस्य स्वगाकर्तारं | शंयुवाक मन्त्र व्याख्या । (मं. भागः - ब्रा. ३-५-११,१२,१३) |
| २-६-११ | युक्ष्वा हि देव हूतमाँ अश्वान् | संवर्गेष्टि हौत्र मन्त्रः । |
| २-६-१२ | उशन्तस्त्वा हवामहे | पितृयज्ञ हविषां हौत्रमन्त्राः । (ब्राह्मणम् - सं. १-८-५) (ब्रा. २-३-१६ (सौत्रामणी अपि पश्यत) |

| का.प्र.अ | मन्त्रारंभः | विषयः, टिप्पणी |
|---|---|---|
| तृतीय काण्डे | प्रथमः प्रश्नः | न्यून कर्माभिधानम् |
| ३-१-१ | प्रजापतिरकामयत प्रजाः सृजेयेति | दीक्षितेन वक्तव्य मन्त्रेषु अमेध्य दर्शने वर्षणे च वक्तव्यौ। (मं. भागः - सं. १-२-३) |
| ३-१-२ | एष ते गायत्रो भाग इति मे | सोमोपस्थान मन्त्राः, अध्वर्यु कर्तव्य विधयश्च |
| ३-१-३ | यज्ञं वा एतत्संभरन्ति | सोमक्रयणी पदाञ्जनं, २-३ पशु श्रपणार्थस्य अग्नेः प्रणयनम्, ४ पशोरवदान नाशे प्रायश्चित्तं, ५पश्वपहर्तृ नाशार्थं होमश्च। |
| ३-१-४ | प्रजापतेर्जायमानाः प्रजाः | पशूपाकरण मन्त्राः। (ब्राह्मणं - सं. ३-१-४) |
| ३-१-५ | प्राजापत्या वै पशवस्तेषां | पशूपाकरण विधिः। (मं. भागः - सं. ३-१-४) |
| ३-१-६ | यो वा अयथादेवतं यज्ञं | अग्नीध्राभिमर्शनादि विधयः, द्रोण कलशाद्यासादन मन्त्र विशेषाश्च। (मं. भागः - अग्ने नय, इदं विष्णुः, अग्न आयूꣳषि, आवायो भूष, (प्रथमकाण्डे); आघा ये अग्निमिन्धते (ब्रा. २-४-५)) |
| ३-१-७ | इष्टर्गो वा अध्वर्युः | स्पर्धावतोर्यजमानयोः प्रयोगाः केचिन्मन्त्राश्च। (मं. भागः - सं. ४-७-१३ ममाग्ने) |
| ३-१-८ | निग्राभ्याः स्थ देवश्रुतः | उपांशु ग्रहाभिषवः विधिः, मन्त्राश्च। (मन्त्राः, ब्राह्मणं च) |
| ३-१-९ | यो वै देवान्देवयशसेनं | ग्रह मन्त्रोचारणादि धर्माः, आघार संस्राव मन्त्राश्च। (मन्त्राः, ब्राह्मणं च) |
| ३-१-१० | जुष्टो वाचो भूयासं | प्रवृत होमादि मन्त्राभिधानम्। (ब्रा-सं. ६-३-७-१२) (मन्त्राः, ब्राह्मणं च) |
| ३-१-११ | अग्निना रयिमश्नवत् | चित्रादि याज्या पुरोऽनुवाक्याः। (ब्राह्मणं -सं. २-४-६,१०) |

| तृतीय काण्डे द्वितीयः प्रश्नः | | पवमानग्रहादीनां व्याख्यानम् (मन्त्राः, ब्राह्मणम्) |
|---|---|---|
| ३-२-१ | यो वै पवमानानामन्वारोहान् | पवमान ग्रह त्रयम्। (ब्रा., मन्त्रः) |
| ३-२-२ | त्रीणि वाव सवनान्यथ | सवन निरूपणं, तन्मन्त्राश्च। (ब्रा., मन्त्रः) |
| ३-२-३ | परिभूरग्निं परिभूरिन्द्रं | सोमावेक्षणम्। (मन्त्रः, ब्रा.) |
| ३-२-४ | स्फ्यः स्वस्ति विघनः | स्फ्याद्युपस्थान मन्त्राः, विधिश्च। (मन्त्रः) |
| ३-२-५ | भक्षेहि मा विंश दीर्घायुत्वाय | भक्ष मन्त्राः। (मन्त्रः) |
| ३-२-६ | महीनां पयोऽसि विश्वेषां | पृषदाज्यं, दधिघर्म मन्त्रश्च। (मं. ब्रा.) |
| ३-२-७ | देवसवितरेतत्ते प्राऽऽह | स्तुत शस्त्रयोरभिधानम्। (मं. ब्रा.) |
| ३-२-८ | श्येनाय पत्वने स्वाहा | प्रस्थित याज्याख्य होमादि मन्त्राः। (मं.,ब्रा) |
| ३-२-९ | यद्वै होताध्वर्युमभ्याह्वयते | प्रतिगरः, तन्मन्त्राश्च। (ब्रा.,मं) |
| ३-२-१० | उपयाम गृहीतोऽसि वाक्ष सदसि | प्रतिनिग्राह्य मन्त्राः। |
| ३-२-११ | प्र सो अग्ने तवोतिभिः | त्रैधातवीयेष्टि मन्त्राः। (ब्राह्मणं - सं. २-४-११-१०) |

| तृतीय काण्डे तृतीयः प्रश्नः | | वैकृत विधीनामभिधानम्॥ |
|---|---|---|
| ३-३-१ | अग्ने तेजस्विन् तेजस्वी त्वं | अतिग्राह्य गत मन्त्राः। |
| ३-३-२ | वायुर्हिंकर्ताऽग्निः प्रस्तोता | स्तोत्रोपाकरणं, प्रतिगरांग मन्त्राश्च। |
| ३-३-३ | वसवस्त्वा प्र वृहन्तु | अदाभ्यांशु ग्रह मन्त्राः (ब्रा - सं. ३-३-४) |
| ३-३-४ | एतद्वा अपां नामधेयं गुह्यं | अदाभ्यांशु ग्रह मन्त्र ब्राह्मणम्। (मं - सं. ३-३-३) |
| ३-३-५ | वायुरसि प्राणो नाम | द्वादशाह शेषाः पृश्निग्रहाख्या उन्मान विशेषाः।(मं-ब्रा.) |
| ३-३-६ | देवा वै यद्यज्ञेन नावारुन्धत | गवामयन गताः परः संज्ञका अतिग्राह्याः। (ब्रा - मं.) (ब्रा. १-२-२-७,८) |
| ३-३-७ | प्रजापतिर्देवासुरानसृजत | सोमांगाश्रावणादि मन्त्र विधानम्। (सं. १-६-११ पश्यत) |

| | | |
|---|---|---|
| ३-३-८ | आयुर्दा अंग्ने हविषों जुषाणः | अव भृथांग वेदि दाहादि मन्त्राः। (मं - ब्रा.) |
| ३-३-९ | एतं युवानं परिं वो ददामि | जीर्ण वृषभालंभः । (मं - ब्रा) |
| ३-३-१० | सूर्यो देवो दिविषद्भ्यः | पाशुक गर्भ प्रायश्चित्तम् । (ब्रा - सं. ३-४-१) |
| ३-३-११ | इदं वांमास्यें हविः | याज्या पुरोऽनुवाक्याः । (ब्रा - सं.२-४-१३, सं.१-८-८, विविचीष्टिः ब्रा. ३-७-३) (सं. ३-४-९-११ राका,कुहूः,सिनीवाली,अनुमतिः) |

## तृतीय काण्डे चतुर्थः प्रश्नः    इष्टि होमाभिधानम् ॥

| | | |
|---|---|---|
| ३-४-१ | वि वा एतस्यं यज्ञ ऋध्यते | वशागर्भ दर्शननिमित्तक होमविधिः (मं. सं. ३-३-१०) |
| ३-४-२ | अ वायो भूष शुचिपाः | वशालंभन मन्त्राः। (ब्रा - सं. ३-४-३-(९-२४)) |
| ३-४-३ | इमे वै सहाऽऽस्तां ते वायुर्व्यवात् | काम्याजा वशा विधानम् । (ब्रां- सं.३-४-२) |
| ३-४-४ | चित्तं च चित्तिश्चाऽऽकूंतं च | जयहोम मन्त्राः, तत्प्रशंसा च (मं - ब्रा) |
| ३-४-५ | अग्निर्भूतानामधिंपतिः | अभ्यातान मन्त्राः (ब्रा - सं. ३-४-६) |
| ३-४-६ | देवा वै यद्यज्ञेऽकुंर्वत | जयाभ्यातान राष्ट्र भृद्धोमविधानम् (मं - सं. ३-४-४,५७) |
| ३-४-७ | ऋताषाडृतधांमाऽग्निर्गंन्धर्वः | राष्ट्र भृन्मन्त्राः (ब्रा-सं. ३-४-६,८, सं. ५-४-९-७, सं. ५-७-४-(४-९)) |

(बोधायन प्रोक्ते उदक शान्ति जपे विनियुज्यते)

| | | |
|---|---|---|
| ३-४-८ | राष्ट्रकांमाय होतव्यां राष्ट्रं वै | राष्ट्र भृन्मन्त्राणां काम्य प्रयोगाः । (मं-सं. ३-४-७) |
| ३-४-९ | देविंका निर्वंपेत्प्रजाकांमः | देविकाख्य हविषां काम्य प्रयोगाः। (मं-सं. १-८-८, ३-३-११-(७-२०) |
| ३-४-१० | वास्तोष्पते प्रतिं जानीह्यस्मान् | प्रवत्स्यतोऽग्निहोत्रिणो होमः, समारोपश्च । (मं - ब्रा) (ब्रा.२-५-८) |
| ३-४-११ | त्वमंग्ने बृहद्वयो दधांसि | राजसूय गता याज्या पुरोऽनुवाक्याः । (ब्रा-सं. १-८-१०) |

## तृतीय काण्डे पञ्चमः प्रश्नः — इष्टि शेषाभिधानम् ॥

| | | |
|---|---|---|
| ३-५-१ | पूर्णा पश्चादुत पूर्णा पुरस्तात् | दर्शपूर्णमासांग भूत आरंभणीयेष्टिः (मं - ब्रा) |
| ३-५-२ | ऋषयो वा इन्द्रं प्रत्यक्षं | सौमिक ब्रह्मत्व विधिः । (मं - सं. ४-४-१) (ब्रा - सं. ५-३-६) |
| ३-५-३ | अग्निना देवेन पृतना जयामि | विष्ण्वतिक्रमाः । (मं) |
| ३-५-४ | ये देवा यज्ञहनो यज्ञमुषः | अतिमोक्ष मन्त्राः । (मं - ब्रा) |
| ३-५-५ | सूर्यो मा देवो देवेभ्यः पातु | आदित्य ग्रह मन्त्राः । (मं) |
| ३-५-६ | सं त्वा नह्यामि पयसा घृतेन | पत्नीविषयका योक्त्र बन्धादि मन्त्राः । |
| ३-५-७ | वषट्कारो वै गायत्रियै | स्रुचां वृक्षावशेषविधानम् । (सं. ६-१-६, ब्रा. १-१-३-१६, ३-२-१-१ पश्यत) |
| ३-५-८ | उपयाम गृहीतोऽसि प्रजापतये | दधिग्रह मन्त्राः । (ब्रा - सं. ३-५-९) |
| ३-५-९ | यां वा अध्वर्युश्च यजमानश्च | दधिग्रहविधानम् (मं- सं. ३-५-८) |
| ३-५-१० | त्वे क्रतुमपि वृञ्जन्ति विश्वे | अति ग्राह्याः प्राणग्रहाश्च । (मं - ब्रा) (मं-सं. ४-३-२) |
| ३-५-११ | प्र देवं देव्या धिया | पाशुक हौत्रोपयोगि मन्त्राः । (ब्रा.३-६ अञ्जन्ति त्वामध्वरे..पश्यत) |

| का.प्र.अ | मन्त्रारंभः | विषयः, टिप्पणी |
|---|---|---|
| **चतुर्थ काण्डे प्रथमः प्रश्नः-अग्नि चित्यंग मन्त्र पाठाभिधानम्।(अस्य ब्राह्मणं- सं.५-१)** | | |
| ४-१-१ | युञ्जानः प्रथमं मनस्तत्वाय | अभ्यादानम्। (ब्रा - सं. ५-१-१)<br>(अग्नेः आदानम्-खनन हेतुः काष्ठविशेषः अभ्रिः) |
| ४-१-२ | इमामगृभ्णन् रशनामृतस्य | मृदाक्रमणम्। (ब्रा .सं. ५-१-२, सं. ५-१-३) |
| ४-१-३ | देवस्य त्वा सवितुः प्रसवे | मृत्खननम्। (ब्रा -सं. ५-१-४) |
| ४-१-४ | सं ते वायुर्मातरिश्वा दधातु | मृदाहरणम्। (ब्रा -सं. ५-१-५) |
| ४-१-५ | वि पाजसा पृथुना शोशुचानः | उखानिर्माणम् (ब्रा -सं. ५-१-६) |
| ४-१-६ | वसवस्त्वा धूपयन्तु गायत्रेण | उखा संस्कारः (ब्रा -सं. ५-१-७) |
| ४-१-७ | समास्त्वाऽग्न ऋतवो वर्धयन्तु | अग्निचयनांग पशु सामिधेन्यः। (ब्रा -सं. ५-१-८) |
| ४-१-८ | ऊर्ध्वा अस्य समिधो भवन्ति | आप्रियो याज्यापुरोऽनुवाक्याः। (ब्रा -सं. ५-८-९)<br>(हिरण्य गर्भः समवर्तताग्रे" (ब्रा -सं. ५-५-१-६)) |
| ४-१-९ | आकूतिमग्निं प्रयुजꣳ स्वाहा | अग्न्युत्पादनम्। (ब्रा -सं. ५-१-९) |
| ४-१-१० | यदग्ने यानि कानि च | अग्निधारणम्। (ब्रा -सं. ५-१-१०)<br>(अस्मिन् १-१० दश ऋचः राक्षोघ्नम् -<br>सं. ५-१-१०-४ पश्यत) |
| ४-१-११ | अग्ने यं यज्ञमध्वरं | चातुर्मास्य गत वैश्वदेवपर्वणि विहित याज्या<br>पुरोऽनुवाक्याः। (ब्रा-सं. १-८-२)<br>(ब्रा. १-६-३ (२७) पश्यत) |
| **चतुर्थ काण्डे द्वितीयः प्रश्नः** | **देवयजन ग्रहाभिधानम्।** | (अस्य प्रश्नस्य ब्राह्मणं-सं. ५-२) |
| ४-२-१ | विष्णोः क्रमोऽस्यभिमातिहा | आसन्द्यामुखाग्नि स्थापनम् (ब्रा - सं. ५-२-१) |
| ४-२-२ | दिवस्परि प्रथमं जज्ञे | आसन्द्यां स्थापितस्य अग्नेरुपस्थानम्।<br>(ब्रा -सं.५-२-१-१३) |
| | (आपस्तम्बिनां जातकर्मप्रयोगे विनियुज्यते) | |
| ४-२-३ | अन्नपतेऽन्नस्य नो देहि | चयनार्थस्य देवयजनस्य परिग्रहः। (ब्रा - सं. ५-२-२) |

४-२-४ अपे॑त॒ वीत॒ वि च॑ सर्प॒तात॑ः गार्हपत्य चयनम् । (ब्रा - सं. ५-२-३)

४-२-५ समि॑त॒ꣳ॒ सं क॑ल्पेथा॒ꣳ॒ संप्रि॑यौ आहवनीय चयनार्थं भुवःकर्षणम् । (ब्रा - सं. ५-२-४)

४-२-६ या जा॒ता ओष॑धयो दे॒वेभ्य॑ः कृष्टायां भुवि ओषधि वापः । (ब्रा - सं. ५-२-५-१५)

(चतुर्दशभिः ओषधीर्वपति । विकल्पिताः षड्टचः ।)(अंकुरार्पणे ओषधि सूक्त जपे विनियुज्यते ।)

४-२-७ मानो॑ हिꣳसीज्जनि॒ता लोष्टक्षेपादिकम् । (ब्रा - सं.५-२-५-२२,. ५-२-६)

(स॒मु॒द्रं वै नामै॒तच्छन्द॑ः(सं.५-२-६-३) यथा समुद्रो बहुलं एवं अत्रत्य छन्दोऽपि बहुविधत्वात् समुद्रमित्युच्यते ।)

४-२-८ अ॒भ्य॑स्था॒द्विश्वा॒ः पृत॑ना॒ अरा॑तीः अश्वाक्रमण पुष्करपर्णोपधान रुक्मोपधानादि । (ब्रा - सं. ५-२-७)

(नमो॑ अस्तु स॒र्पेभ्य॑ः इति तिस्रः उदक शान्ति जपे विनियुज्यते ।)

४-२-९ ध्रु॒वाऽसि॑ ध॒रुणास्तृ॑ता स्वयमातृण्णाद्युपधानम् । (ब्रा - सं. ५-२-८, ५-५-२)

४-२-१० आ॒दि॒त्यं गर्भं॒ पय॑सा सम॒ञ्जन् पशु शीर्षोपधानम् (ब्रा-सं. ५-२-९)

४-२-११ इन्द्रा॑ग्नी रोच॒ना दि॒वः याज्यानुवाक्याः (चातुर्मास्येषु द्वितीयं वरुण-प्रघास पर्व-सं. १-८-३)

---

## चतुर्थकाण्डे तृतीयः प्रश्नः चिति वर्णनम्

४-३-१ अ॒पां त्वेम॑न्त्सादयामि प्रथमचितौ अपस्याभिधानेष्टकोपधानम् । (ब्रा - सं.५-२-१०)

४-३-२ अ॒यं पु॒रो भु॒वस्तस्य॑ प्रा॒णः प्रथमचितौ प्राण भृदिष्टकोपधानम् । (ब्रा-सं. ५-२-१०)

४-३-३ प्राची॑ दि॒शां व॑स॒न्त ऋ॑तू॒नां प्रथमचितौ अपानभृदिष्टकोपधानम् (ब्रा -सं. ५-२-१०-१४)

४-३-४ ध्रु॒वक्षि॑तिर्ध्रु॒वयो॑निः द्वितीयचितौ अश्विन्यादीष्टकोपधानम् । (ब्रा -सं. ५-३-१)

४-३-५ त्र्य॒विर्वय॑स्त्रि॒ष्टुप् छन्द॑ः द्वितीय चितौ वयस्याख्येष्टकोपधानम् । (ब्रा-सं.५-३-१-१२)

४-३-६ इन्द्रा॑ग्नी॒ अव्य॑थमानां तृतीयचितौ स्वयमातृण्णाद्युपधानम् । (ब्रा-सं. ५-३-२)

४-३-७ मा छन्द॑ः प्र॒मा छन्द॑ः तृतीय चितौ बृहत्याद्युपधानम् । (ब्रा-सं. ५-३-२-१०)

(मूर्धासि राडिति सप्त वाल खिल्याः पुरस्तात्प्राचीः, यन्त्री राडिति सप्त पश्चात्प्राचीः)

४-३-८ आ॒शुस्त्रि॒वृद्भा॒न्तः प॑ञ्चद॒शः चतुर्थचितौ स्तोमीयाख्येष्टकासु कासांचिदुपधानम् । (ब्रा - सं. ५-३-३)

४-३-९ अ॒ग्नेर्भा॒गो॑ऽसि दी॒क्षाया॒ आधि॑पत्यं अवशिष्ट स्तोमीयोपधानम् । (ब्रा-सं. ५-३-४)

| सं.१-३-१४ (१९,२०)<br>अग्ने सहन्तं, तमग्ने पृतना... | सं.२-२-३ (८)<br>अग्नये साहन्त्याय पुरोडाशं... | अग्निः<br>(साहन्त्यः) |
| सं.१-३-१४ (२१,२२)<br>उक्षान्नाय, वद्मा हि सूनो... | सं.२-२-४ (१)<br>अग्नयेऽन्नादाय पुरोडाशं... | अग्निः<br>(अन्नवान्) |
| सं.१-३-१४ (२३-२८)<br>अग्न आयूꣳषि, अग्ने पवस्व,<br>अग्ने पावक, स नः पावक,<br>अग्निः शुचिव्रततमः,<br>उदग्ने शुचयस्तव | सं.२-२-४ (२-५)<br>अग्नयेऽन्नादाय पुरोडाशं...<br>अग्नयेऽन्नपतये पुरोडाशं...<br>अग्नये पवमानाय पुरोडाशं...<br>एतामेव निर्वपेच्चक्षुष्कामः... | अग्निः (अन्नादः,<br>अन्नपतिः)<br>अग्निः<br>(पवमानः)<br>अग्निः (शुचिः) |
| सं.१-४-४६ (१,२)<br>यस्त्वा हृदा, यस्मै त्वं | सं.२-२-४ (६)<br>अग्नये पुत्रवते पुरोडाशं... | अग्निः<br>(पुत्रवान्) |
| सं.१-४-४६ (३,४)<br>त्वे सुपुत्र, उक्थ उक्थे | सं.२-२-४ (६)<br>इन्द्राय पुत्रिणे पुरोडाशं... | इन्द्रः<br>(पुत्री) |
| सं.१-४-४६ (५,६) अग्ने रसेन,<br>अपो अन्वचारिषꣳ | सं.२-२-४ (७)<br>अग्नये रसवतेऽजक्षीरे चरुं | अग्निः<br>(रसवान्) |
| सं.१-४-४६ (७,८)<br>वसुर्वसुपतिः, त्वामग्ने वसुपतिं | सं.२-२-४ (८)<br>अग्नये वसुमते पुरोडाशं... | अग्निः<br>(वसुमान्) |

| | | |
|---|---|---|
| सं.१-४-४६ (९,१०) त्वाम॑ग्ने वा॒जसा॑तमं, अ॒यं नो॑ अ॒ग्निः | सं.२-२-४ (९) अ॒ग्नये॑ वाज॒सृते॑ पु॒रोडाशं᳚... | अग्निः (वाजसृत्) |
| सं.१-४-४६ (११,१२) अ॒ग्निना॒ग्निः, त्वꣳ ह्य॑ग्ने | सं.२-२-४ (१०) अ॒ग्नयेऽग्नि॒वते॑ पु॒रोडाशं᳚... | अग्निः (अग्निवान्) |
| सं.१-४-४६ (१३,१४) उद॑ग्ने॒ शुच॑यः★, वि ज्योति॑षा ★ | सं.२-२-४ (११-१८) अ॒ग्नये॒ ज्योति॑ष्मते पु॒रोडाशं᳚... | अग्निः (ज्योतिष्मान्) |
| सं.१-५-११ (१-१२) वै॒श्वा॒न॒रो न॑ ऊ॒त्या, ऋ॒तावा॑नं, वै॒श्वा॒न॒रस्य॑, पृ॒ष्टो दि॒वि पृ॒ष्टो, जा॒तो यद॑ग्ने, त्वम॑ग्ने शो॒चिषा॒, अ॒स्माक॑मग्ने, वै॒श्वा॒न॒रस्य॑ सु॒म॒तौ, | सं.२-२-५ (१-६) (त्रिहविष्का) वै॒श्वा॒न॒रं द्वाद॑शकपाल॒ं निर्व॑पेत् (चत्वारि युग्मानि विकल्पितानि) (प्रथम हविषः) एतानि चत्वारि युग्मानि श्रूयमाणेषु सर्वेष्वपि वैश्वानर यागेषु इच्छया विकल्प्यन्ते ॥ | अग्निः (वैश्वानरः) |
| अव॑ ते॒ हेडः॑, उदु॒त्तमं॑ वरुण॒, | (द्वितीय हविषः ) | वरुणः |
| द॒धि॒क्राव्ण्णो॑, आद॑धि॒क्राः | (तृतीय हविषः) | दधिक्रावा |
| दधि क्रामति प्राप्नोतीति दधिक्रावा, एतन्नामको दधिप्रियः कश्चिद्देव विशेषः । (अग्निः) | | |
| सं.१-५-११ (१३,१४) अ॒ग्निर्मू॒र्धा ★, भुवः॑ ★ | आ॒ग्ने॒यम॒ष्टाक॑पालं (सं.२-२-५-७) | अग्निः |
| सं.१-५-११ (१५-१६) मरु॑तो॒ यद्ध॑वो, याव॒ः शर्म॑ शश | सं.२-२-५-(८-१३) वै॒श्वा॒न॒रं द्वाद॑शकपाल॒ं निर्व॑पेन्मारु॒तꣳ | मरुतः |
| सं.१-५-११ (१७ -२०) अदि॑तिर्न उरुष्यतु, म॒हीमू॒षु, सु॒त्रामा॑णं, इ॒मा ꣳ सुनाव॑᳚... | सं.२-२-६ (१-९) आ॒दि॒त्यं च॒रुं निर्व॑पेत् संग्रा॒मम॑ुप (अत्र युग्मद्वयं आम्नातम्) | अदितिः |
| सं.१-६-१२ (१,२) इन्द्रं॑ वो वि॒श्वत॑ः, इन्द्र॒ं नरो॑ | सं.२-२-७ (१,२) ऐ॒न्द्रं च॒रुं निर्व॑पेत् प॒शुका॑मः | इन्द्रः |
| सं.१-६-१२ (३,४) इ॒न्द्रि॒याणि॑ शतक्रतो, अनु॑ ते दायि | सं.२-२-७ (३) इन्द्रा॑येन्द्रि॒याव॑ते पु॒रोडाशं᳚... | इन्द्रः (इन्द्रियावान्) |

| | | |
|---|---|---|
| सं.१-६-१२ (५-६)<br>आयस्मिँन्त्सप्त, आमासु पक्वं | इन्द्राय घर्मवते पुरोडाशं... (४) | इन्द्रः<br>(घर्मवान्) |
| इन्द्रमिद् गाथिनो, गायन्ति त्वा<br>(७,८) | इन्द्रायार्कवते पुरोडाशं... (५) | इन्द्रः<br>(अर्कवान्) |
| अꣳहोमुचे, विवेष यन्मा<br>(९,१०)<br>प्रसम्राजं प्रथमं (११) | इन्द्रायाꣳ होमुचे (७)<br><br>(वैकल्पिका याज्या) | इन्द्रः<br>(अंहोमुक्) |
| विन इन्द्र, इन्द्रं क्षत्रमभि<br>(१२,१३) मृगो न भीमः,<br>वि शत्रून् (१४-१५) | इन्द्राय वैमृधाय (८)<br><br>(वैकल्पिक पुरोनुवाक्या, याज्या) | इन्द्रः<br>(वैमृधः) |
| त्रातारमिन्द्रं, मा ते अस्याꣳ<br>(१६,१७) | इन्द्राय त्रात्रे (९) | इन्द्रः<br>(त्राता) |
| अनवस्ते रथं, वृष्णे यत्ते<br>(१८,१९) | इन्द्रायार्काश्वमेधवते (१०) | इन्द्रः<br>अर्काश्वमेधवान् |
| सं.१-७-१३, अन्वह मासाः,<br>अनु ते दायि (१,२) | सं.२-२-८ इन्द्रायान्वृजवे पुरोडाशं... (१) | इन्द्रः (अन्वृजुः) |
| इन्द्राणीमासु, नाहमिन्द्राणि<br>(३,४) | इन्द्राण्यै चरुं निर्वपेत् (२,३) | इन्द्राणी |
| (अत्र विकल्पिते याज्यानुवाक्ये - इन्द्राणी देवी, सेना ह नाम (ब्रा.२-४-२ (१८))) | | |
| यो जात एव, आ ते महः (५,६) | इन्द्राय मन्युमते मनस्वते (४,५) | इन्द्रःमन्युमान्<br>मनस्वान् |
| मानो मर्धीः, आ तू भर (७,८) | इन्द्राय दात्रे पुरोडाशं... (६) | इन्द्रः (दाता) |
| प्रदातारꣳ, प्रदाता वज्री (९,१०) | इन्द्राय प्रदात्रे पुरोडाशं... (७) | इन्द्रः (प्रदाता) |
| (अत्र उपहोम मन्त्राःआत्वा हार्षं, ध्रुवा द्यौः, इहैवैधि,अभितिष्ठ, इन्द्रं एणं इति पञ्च ऋचः ब्रा.२-४-२(२०-२४) | | |
| इन्द्रः सुत्रामा, तस्य वयꣳ<br>(११,१२) | इन्द्राय सुत्राम्णे पुरोडाशं... (८) | इन्द्रः सुत्रामा |
| (१३-१४) रेवतीर्नः, प्रोष्वस्मै | इन्द्रो वै सदृङ् देवताभिः(९-११)<br>(१४ - शक्वरी छन्दः) | इन्द्रः |

| | | |
|---|---|---|
| सं.१-८-२२ (१,२)<br>अग्ना॑विष्णू, अग्ना॑विष्णू॒ | सं.२-२-९, आ॒ग्ना॒वै॒ष्ण॒वमेका॑दश(१-१०)<br>(त्रिहविष्का इ॒ष्टिः) | अग्नाविष्णू॒ |
| प्रणो॑ दे॒वी, आ नो॑ दि॒वः (३,४) | | सरस्वती |
| बृह॑स्पते जु॒षस्व॑, ए॒वा पि॒त्रे (५,६) | | बृहस्पतिः |
| बृह॑स्पते॒ अति॒ (७) | वैकल्पिका याज्या | |

अत्र उपहोम मन्त्राः नव - चक्षु॑षो हेते॒...इत्यादि, भ्रातृ॑व्यं पादयामसि इत्यन्तं
(ब्रा.२-४-२-(१-९)-ए॒तयै॒व य॑जेताभि च॒र्यमा॑णः .. सं.२-२-९-३)

| | | |
|---|---|---|
| सं.१-८-२२ (८,९) आनो॑<br>मित्रावरुणा, प्रबा॒हवा॑ सिसृतं | सं.२-२-९(११)<br>मै॒त्रा॒व॒रु॒णमेक॑कपालं | मित्रावरुणा |
| सं.१-८-२२ (१०-१५) अ॒ग्निं<br>वः॑ पू॒र्व्यं, म॒क्षू देवव॑तः, न य॑ज-<br>मान रि॑ष्यसि॒, अस॒दत्र॑ सु॒वीर्यं॑,<br>न कि॒ष्टं कर्म॑णा, उप॑ क्षरन्ति<br>सं.१-८-२२ (१६,१७) सोमा॑<br>रुद्रा॒ विवृ॑हतं, सोमा॑रुद्रा यु॒वं | सं. २-२-१०<br>अ॒सावा॑दि॒त्यो न व्य॑रोचत॒..<br>सो॒मा॒ रौ॒द्रं च॒रुं---<br>(१०-१५ अस्मिन् चरौ धाय्यात्वेन षडृचः)<br><br>(पुरोनुवाक्या, याज्या) | सोमारुद्रा |
| सं.१-८-२२ (१८,१९)<br>सोमा॑पूषणा॒ जन॑ना, इ॒मौ दे॒वौ | सं २-२-१० (६)<br>यदि॑ बिभी॒याद् दु॒श्चर्मा॑ --- | सोमापूषणा |
| सं.२-१-११ इन्द्रं॑ वो ★इन्द्रं॒<br>नरः॑★(१,२) मरु॑तो॒ यद्ध॑वो★,<br>याव॒ः शर्म॑ ★(३,४) | सं.२-२-११<br>ऐ॒न्द्रमेका॑दशकपालं॒ निर्व॑पेन्मारुतꣳ<br>स॒प्तक॑पालं (१-३) | इन्द्रः,<br>मरुतः |
| भरे॒ष्विन्द्रꣳ॑, म॒मत्तु॑ नः (५,६) | ऐ॒न्द्रमेका॑दशकपालं॒ निर्व॑पेद्वैश्वदे॒वं (४) | इन्द्रः, वैश्वदेवः |
| प्रि॒या वो॒ नाम॑, श्रि॒यसे॒ कं (७,८) | पृश्ञि॑यै दु॒ग्धे प्रैय॑ङ्गवं च॒रुं (५) | मरुतः |
| अ॒ग्निः प्र॑थ॒मो वसु॑भिः, संनो॑ दे॒वो<br>वसु॑भिः (९-१०),<br>यथा॑दि॒त्या वसु॑भिः (११) | दे॒वासु॒राः संय॑त्ता आसन् (६)<br><br>वैकल्पिका याज्या | अग्निः (वसुमान्॒) |

| | | |
|---|---|---|
| सं.२-१-११ (१२,१३) कुत्राचिदस्य, सं यदिषो | स्विष्टकृतः पुरोनुवाक्या, याज्या | अग्निः स्विष्टकृत् |

संगच्छध्वं इत्यादि (५) ब्रा.२-४-४ (११-१५) पञ्च मन्त्राः 'यः समानैर्मिथो विप्रियः स्यात्, तमेतया संज्ञान्या याजयेत्' (सं.२-२-११(३) इत्यत्र द्रष्टव्याः ॥

| | | |
|---|---|---|
| सं.२-१-११ यज्ञो देवानां, शुचिरपः (१४,१५) | सं.२-३-१ आदित्येभ्यो भुवद्वद्भ्यः (१) | आदित्याः (भुवद्वन्तः) |

**यदीययोः याज्या पुरोनुवाक्ययोः भुवच्छब्दः श्रूयते त एत आदित्या भुवद्वन्तः । यद्यपि पुरोनुवाक्यायां भवता मृडयन्तः इति भवतेत्ययं शब्दः पठितः, यद्यपि च याज्यायां भवति प्रणीताविति भवतीत्येष शब्दः पठितः न तु भुवच्छब्दः क्वाप्यस्ति, तथापि वर्ण विकारमभिप्रेत्य भुवद्वद्भ्य इत्युच्यते । एवमन्यत्रापि वायवे नियुत्वत आलभेत, अग्नये पथिकृत इत्यादौ विशेषणैः याज्यानुवाक्या गताः शब्दाः स्मर्यन्त इति द्रष्टव्यम् । ते च याज्यादि गताः शब्दाः तत्तत्प्रकृतोचित फलस्य सूचकाः । अतोऽत्रापि भूति सूचक भुवच्छब्दवन्तः इत्युक्तं भवति । तथा सति भुवद्वन्तः फलत्वेन दातव्य भूतिमन्त इत्यर्थोऽपि लभ्यते ॥**

| | | |
|---|---|---|
| धारयन्त आदित्यासः, तिस्रो भूमीः (१६-१७) | आदित्येभ्यो धारयद्वद्भ्यः (२) | आदित्याः (धारयद्वन्तः) |
| त्यान्नु क्षत्रियाꣳ, न दक्षिणा (१८-१९) आदित्यानामवसा (२०) | यः परस्ताद् ग्राम्यवादी (७) (८-१३) (शुक्ल हविषः पुरोनुवाक्या, याज्या) वैकल्पिका याज्या | आदित्याः |
| इमं मे वरुण, तत्वायामि ब्रह्मणा (२१,२२) | (कृष्ण हविषः) | वरुणः |
| सं.२-२-१२ हिरण्यगर्भः★, आपो ह यत् ★ (१,२) प्रजापते ★, सवेद पुत्रः (३,४) | सं.२-३-२ देवा वै मृत्योरबिभयुः (१-६) (याज्यानुवाक्ये द्विविधे विकल्पिते) | प्रजापतिः |
| उदुत्यं ★चित्रं ★ (५-६) | असावादित्यो न व्यरोचत (७-९) | सूर्यः |
| सप्रत्नवन्नवीयसा, नि काव्या (७,८) | आग्नेयमष्टाकपालं निर्वपेत् (१०-१२) | अग्निः |

| | | |
|---|---|---|
| सं.२-२-१२ (९,१०) हिर॑ण्यपाणिमू॒तये॑, वा॒मम॒द्य | सा॒वि॒त्रं द्वाद॑शकपालं | सविता |
| बडि॒त्था पर्व॑तानां, स्तोमा॑सस्त्वा (११,१२) | भूम्यै॑ च॒रुं | भूमिः |
| ऋ॒दू॒दरे॑ण, आपा॑न्तमन्युः (१३,१४) | वि वा ए॒ष इ॑न्द्रि॒येण॑ सोम (१३-१५) | सोमः इन्द्रश्च |
| प्रसु॑वा॒नः, स॒बाध॑स्ते (१५-१६) | वैकल्पिके पुरोनुवाक्या, याज्या | |
| वष॑ट् ते विष्णो, प्रतत् ते॑ अ॒द्य (१७,१८) | सं.२-५-५-२ येऽणि॑ष्ठा॒स्तान् विष्ण॑वे शिपिवि॒ष्टाय॑ शृ॒ते च॒रुं (अभ्युदयेष्टौ) | विष्णुः |
| किमित्ते॑ विष्णो (१९) | विकल्पिता याज्या | |
| अग्ने॒ दा दा॒शुषे॑, दा नो॑ अग्ने (२०,२१) | अ॒ग्नये॑ दा॒त्रे पु॑रो॒डाशं॑.. सं.२-३-२(१६-२०) (त्रिहविष्का इ॒ष्टिः) | अग्निः |
| अ॒ग्निर्दा॒ द्रवि॑णं (२२) | विकल्पिता याज्या | |
| मानो॑ मर्धीः★, आतू॒ भ॑र ★ (२३,२४) | इन्द्रा॑य प्रदा॒त्रे | इन्द्रः |
| घृ॒तं न पू॒तं, उ॒भे सु॑श्चन्द्र (२५-२६) | दधि॒ मधु॑ घृ॒तमापो॑... | प्रजापतिः |
| वायो॑ श॒तं॒, प्र याभि॑ः (२७,२८) | वायव्यां यवागूं निर्वपेत् इति विहिते कर्मणि उत्कर्षणीया पुरोनुवाक्या, याज्या (ब्रा.२-८-१-१- अपि पश्यत्) | वायुः |
| रे॒वती॑र्नः, रे॒वाँ इद् (२९,३०) | क्वापि ऐन्द्र कर्मणि उक्ते याज्यानु वाक्ये ॥ | इन्द्रः |
| सं.२-३-१४ स प्र॑त्न॒वत् ★, नि काव्या॑ ★(१,२) | सं.२-३-३ दे॒वा वै स॒त्रमा॑सत (१-३)... आ॒ग्ने॒य म॒ष्टाक॑पालं | अग्निः |
| इन्द्रं॑ वो वि॒श्वत॒स्परि॑ ★, इन्द्रं॒ नर॑ः★ (३,४) | ऐ॒न्द्रमेका॑दशकपालं | इन्द्रः |

| | | |
|---|---|---|
| सं.२-३-१४ (५,६)<br>त्वं नःसोम, या ते धामानि | सौम्यं चरुं | सोमः |
| अग्नीषोमा सवेदसा, युवमेतानि (७,८) | अग्नीषोमीयमेकादशकपालं (४) | अग्नीषोमौ |
| अग्नीषोमाविम९, आऽन्यं दिवो (९,१०)<br>अग्नीषोमा हविषः (११) | अग्नीषोमीयमष्टाकपालं (५)<br>विकल्पिता याज्या | अग्नीषोमौ |
| आप्यायस्व★, सं ते ★ (१२,१३) | सोमाय वाजिने श्यामाकं चरुं निर्वपेद्यः क्लैब्याद्बिभीयात्... (६) | सोमः |

(प्रजनन समर्थः अन्नरसः वाजः तद्वते वाजिने । यदा वाजिनं प्रजनन समर्थान्नरस रूपं रेतः अस्मात्पुरुषादपक्रामति रोगेण अदृष्ट विशेषेण वा तत्सामर्थ्यं प्रति बध्यते, तदानीं अस्य क्लीबत्वं संपद्यते तस्मात् क्लीबत्वात् बिभाय बिभेति...)

| | | |
|---|---|---|
| गणानां त्वा, स इज्जनेन (१४,१५)<br>स सुष्टुभा (१६) | ब्राह्मणस्पत्यमेकादशकपालं (७,८)<br>वैकल्पिता याज्या | ब्रह्मणस्पतिः |
| मरुतो यद्धवः★, या वः शर्म★ (१७, १८) | एतामेव निर्वपेत् (९,१०) | मरुतः । |
| अर्यमाऽऽयाति, ये तेऽर्यमन् (१९,२०) | सं. २-३-४ (१-३)<br>अर्यम्णे चरुं निर्वपेत् | अर्यमा |
| बुध्नादग्रं", बुध्नादग्रेण (२१,२२) | इन्द्रो वै देवानामानुजावरः (४,५) | इन्द्रः |
| प्र यो जज्ञे, महान् मही (२३,२४) बुध्नाद्यो अग्रं" (२५) | यो ब्राह्मण आनुजावरः (६)<br>वैकल्पिता याज्या | बृहस्पतिः |
| सं.२-४-१४ (१,२)<br>नवो नवो भवति, यमादित्याः | सं.२-३-५ (यक्ष्म गृहीतस्येष्टिः)<br>प्रजापतेस्त्रयस्त्रि९शद् दुहितरः (१-४) | आदित्याः |

(अम्बा दुला इत्यादि सप्त कृत्तिकाः अवशिष्टाः षड्विंशतितारकाः एताः त्रयस्त्रिंशत्)

| | | |
|---|---|---|
| सं.२-४-१४ (३-५)<br>प्राच्यां॑ दि॒शि, इन्द्रो॒ जयाति,<br>अ॒स्येदे॒व | सं.२-३-६ (अन्नादन शक्तिकामस्य त्रिधातु संज्ञकः) प्र॒जाप॑ति॒र्दे॒वेभ्यो॒ऽन्नाद्यं॒ व्यादि॑शत्..<br>व्य॒त्यास॒मन्वा॒हानिर्दा॑हाय । | इन्द्रः राजा,<br>इन्द्रः अधिराजः,<br>इन्द्रः स्वराजः |

तिस्रः ऋचः व्यत्यासमन्वाह प्रथमामनूच्य मध्यमया यजेत् , मध्यमामनूच्य उत्तमया यजेत् , उत्तमामनूच्य प्रथमया यजेत्, एवं सर्वा याज्याः पुरोनुवाक्याश्च भवन्ति ॥

| | | |
|---|---|---|
| सं.२-४-१४ | सं.२-३-७(१-९) (सर्व पृष्ठाख्येष्टिः) दे॒वा॒सु॒राः संय॑त्ता आसन्... व्य॒त्यास॒मन्वा॒हानि॑र्दा॑हाय... | |
| ६) अ॒भित्वा॑ शूर- | राथन्तरेन्द्रहविषः पुरोनुवाक्या, रैवतेन्द्र हविषः याज्या | इन्द्रः राथन्तरः |
| ७) त्वामिद्धि हवा॑महे- | राथन्तरेन्द्रहविषः याज्या, बार्हतेन्द्र हविषः पुरोनुवाक्या | इन्द्रः बार्हतः |
| ८) यद् द्याव॑ इन्द्र ते- | बार्हतेन्द्र हविषो याज्या, वैरूपेन्द्र हविषः पुरोनुवाक्या | इन्द्रः वैरूपः |
| ९) पिबा॒ सोम॑मिन्द्र- | वैराजेन्द्रस्य याज्या, शाक्वरेन्द्रस्य पुरोनुवाक्या | इन्द्रः वैराजः |
| १०) रे॒वती॑र्नः सध॒माद॑ः | शाक्वरेन्द्रस्य याज्या, रैवतेन्द्रस्य पुरोनुवाक्या | इन्द्रः शाक्वरः |
| सं.१-४-२२ क॒दाच॒न स्त॒रीर॑सि- | वैरूपेन्द्रस्य याज्या, वैराजेन्द्रस्य पुरोनुवाक्या | इन्द्रः रैवतः |
| उद॑ग्ने॒ शुच॑यः★,<br>वि ज्योति॑षा★ (११,१२) | सं.२-३-८(१-५) (चक्षुष्कामस्येष्टिः)<br>रज॑नो॒ वै कौणे॒यः .. पुरोनुवाक्या याज्या | अग्निः<br>भ्राजस्वान् |
| उदु॒त्यं जा॒तवे॑दसं, स॒प्त त्वा॑ ह॒रितो॒ (१३, १४)<br>चि॒त्रं दे॒वानां॒ (१५) | सौ॒र्यं च॒रुं<br>(विकल्पिता याज्या) | सूर्यः |
| विश्वे॑ दे॒वा ऋ॑ता॒वृध॑ः,<br>विश्वे॑ देवाः शृणुत (१६,१७) | सं.२-३-९-७ वै॒श्व॒दे॒वी९ सां॒ग्र॒ह॒णीं | विश्वे देवाः |
| सं.२-५-१२<br>आयु॑ष्टे ★,आ॒यु॒र्दाः★<br>(१,२) | सं.२-३-११ (आयुरारोग्यकामयोरिष्टिः)<br>अ॒ग्निं वा ए॒तस्य॑ (१) यो ज्योगा॑मयावी॒ स्यात्<br>(२) आ॒ग्ने॒यम॒ष्टाक॑पालं | अग्निः |
| आप्या॑यस्व★,<br>सं ते॑ ★ (३,४) | सौ॒म्यं च॒रुं | सोमः |

| | | |
|---|---|---|
| सं.२-५-१२ (५-६) अवं ते हेडः★, उदुत्तमं ★ | वारुणं दशकपालं | वरुणः |
| प्रणो देवी★, आनो दिवः★ (७,८) | सारस्वतं चरुं | सरस्वती |
| (९-१०) अग्नाविष्णू ★, अग्नाविष्णू ★ | आग्नावैष्णवमेकादशकपालं | अग्नाविष्णू |
| इमं मे वरुण★, तत्वा यामि★ (११,१२ | सं.२-३-१२-१(वारुणीष्टिः) प्रजापतिर्वरुणायाश्वमनयत्-(वारुण चतुष्कपालस्य पुरोनुवाक्या, याज्या) | वरुणः |

यावतोश्वान् प्रतिगृह्णीयात् (प्रति गृह्णातीत्यस्य अन्तर्भावित ण्यर्थत्वात् प्रतिग्राहयति ददातीत्ययमर्थः संपद्यते ।।)

| | | |
|---|---|---|
| उदुत्यं ★, चित्रं (१३,१४) | सं.२-३-१२-५ सौर्यमेककपालमनु निर्वपेत् | आदित्यः |
| अपां न पात्, समन्या यन्ति (१५,१६) (तमस्मेरा युवतयो (१७) | सं.२-३-१२-७ अपोनप्त्रीयं चरुं विकल्पिता याज्या) | अपां नपात् |
| सं.२-५-१२ इन्द्रावरुणयोरह९, इन्द्रावरुणा युवं...(१८-१९) | सं.२-३-१३ (१३) यः पाप्मना गृहीतः स्यात् तस्मा एतामैन्द्रावरुणीं... | इन्द्रावरुणा |
| आनो मित्रावरुणा★, प्र बाहवा ★ (२०-२१) | सं.५-७-६(१३) यथा वै हविः स्कन्दति.. मैत्रावरुण्याऽऽमिक्षया यजेत... | मित्रावरुणा |
| त्वं नो अग्ने वरुणस्य, स त्वं नो अग्ने (२२-२३) | पुनराधेय प्रकरणे आम्नातं-सं.१-५-२-२ वीरहा वा एष देवानां | अग्नीवरुणौ |
| प्र प्रायमग्निः, प्र ते यक्षि (२४,२५) | सं.२-४-१-२ यो भ्रातृव्यावान्त्स्यात्... अग्नये प्रवते (प्रशब्दः यस्य अग्नेरस्ति स प्रवान्) | अग्निः प्रवान् |
| वि पाजसा ★, वि ज्योतिषा ★ (२६,२७) | अग्नये विबाधवते | अग्निः विबाधवान् |

| | | |
|---|---|---|
| सं.२-५-१२  स त्वम॑ग्ने॒, त॒ꣳ सु॒प्रतीक॒ꣳ(२८,२९) | अ॒ग्नये॒ प्रतीकवते | अग्निः प्रतीकवान् |
| अ॒ꣳहो॒मुचे॑ ★वि॒वे॒ष यन्मा॑ ★ (३०,३१) | सं.२-४-२(२) यो भ्रातृ॑व्यवा॒न्त्स्यात्... इन्द्रा॑या॒ꣳहो॒मुचे॒ | इन्द्रः अꣳहोमुक् |
| वि॒न॑ इन्द्र ★, इन्द्र॑ क्ष॒त्रं ★ (३२,३३) | इन्द्रा॑य वैमृ॒धाय॑ | इन्द्रष वैमृधः |
| इ॒न्द्रि॒याणि॑ शतक्रतो ★, अनु॑ ते दायि ★(३४,३५) | इन्द्रा॑येन्द्रि॒याव॑ते | इन्द्रः इन्द्रियावान् |

**स॒त्यं प्रप॑द्ये (ब्रा.३-५) इत्यादिक एको हौत्रकाण्डः । उ॒भावा॑मिन्द्राग्नी इत्यादिः अन्त्यानुवाकात्मकः अपरः । तयोः काण्डयोः याज्ञिकानां समाख्यया हौत्रत्वम् । तथा 'यु॒क्ष्वा हि' (सं.२-६-११) इत्यस्यापि अनुवाकस्य इति द्रष्टव्यम् ॥**

सं.२-६-११ (संवर्गेष्टि हौत्रमन्त्राः) यु॒क्ष्वा हि.. नम॑स्ते अग्न॒ ओज॑से (१-१०) दश सामिधेन्यः । कु॒वित्सु नो॒, मानो॑ अस्मिन् (११-१२) पुरोनुवाक्या, याज्या । अ॒न्यम॒स्मद्भि॒या (१३) विकल्पिता याज्या । अग्निः देवता ।

| | |
|---|---|
| यस्याजु॑षन् ,पर॑स्या॒ अधि॑(१४,१५) | स्विष्टकृतः पुरोनुवाक्या, विकल्पिता पुरोनुवाक्या |
| वि॒द्मा हि ते॑ (१६) | स्विष्टकृतः याज्या |

य उ॒ग्र इ॑व, सखा॑यः॒ सं॑वः, सꣳ स॒मिद् यु॑वसे (१७-१९) उपहोमार्थाः ॥

| | | |
|---|---|---|
| सं.२-६-११ (२०-२१) प्रजा॑पते॒ ★ स वे॑द ★ | सं.२-४-४ यः प्र॒जाका॑म॒ः स्यात् (२) | प्रजापतिः |
| (२२-२३) सोमा॑पूषणा ★, इ॒मौ दे॒वौ ★ | यः प॒शुका॑म॒ः स्यात् (४) | सोमापूषणा |

| | | |
|---|---|---|
| सं.२-६-१२ | सं.१-८-५ राजसूये महापितृयज्ञः सोमा॑य पितृ॒मते॑ पुरो॒डाश॒ꣳ(१) | |
| उ॒शन्त॑स्त्वा हवामहे (१) | सामिधेनी | |
| त्वꣳ सोम॒ प्रचि॑कितो, त्वया॒ हि नः॑ (२,३) | पुरोनुवाक्ये | सोमः |
| त्वꣳसोम पि॒तृभिः॑ (४) | याज्या | |

| | | |
|---|---|---|
| सं.२-६-१२<br>अग्निष्वात्ताः पितरः (५) | सं.१-८-५ (१)<br>पि॒तृभ्यो॑ऽग्निष्वा॒त्तेभ्यः॑ (पुरोनुवाक्या) | पितरःअग्निष्वात्ताः |

(द्वितीया पुरोनुवाक्या याज्या च - ब्रा.२-६-१६ सौत्रामण्यां आम्नातम्।

अ॒ग्नि॒ष्वा॒त्तानृ॑तुमतो॑ (ब्रा.२-६-१६-११) द्वितीया पुरोनुवाक्या

ये अ॑ग्निष्वा॒त्ता येऽन॑ग्नि...(ब्रा.२-६-१६-१२) विकल्पिता पुरोनुवाक्या)

वा॒न्या॑यै दु॒ग्धे (ब्रा.२-६-१६-१३) - याज्या)

पि॒तृभ्यो॑ ब॒र्हि॒षद्भ्यो॑ धा॒नाः सं.१-८-५ (१)

| | | |
|---|---|---|
| बर्हि॑षदः पितरः, आहं पि॒तॄन् (६,७) | (प्रथमा द्वितीया पुरोनुवाक्या) | पितरः बर्हिषदः |
| उप॑हूताः पि॒तरः॑ (८) | याज्या | |
| उदी॑रता॒मव॑रे, इ॒दं पि॒तृभ्यो॒, अधा॒ यथा॑ नः (९-११) - अत्रैव उपहोमाः ॥ | | |

(ब्रा.१-८-६-१८ पि॒तॄणां या॑ज्यानुवा॒क्याभि॒रुप॑तिष्ठते। उदीरतां इत्यादयः।)

| | | |
|---|---|---|
| यद॑ग्ने कव्यवाहन, त्वम॑ग्न ईडि॒तो (१२-१३) | शाखान्तरे, अग्नये कव्यवाहनाय यमाय वा मन्थं यमायांगिरस्वते पितृमते इति।<br>प्रथमा, द्वितीया पुरोनुवाक्या | अग्निः कव्यवाहनः |
| मात॑ली क॒व्यैः (१४) | याज्या | |
| इ॒मं य॑म प्रस्त॒रमा, अंगि॑रोभि॒राग॑हि (१४,१६) | प्रथमा, द्वितीया पुरोनुवाक्या | यमः अङ्गिरस्वान् |
| अङ्गि॑रसो नः पि॒तरो॒ (१७) | याज्या | |
| (सौत्रामण्यां कौकिल्यां - स्विष्टकृतः पुरोनुवाक्या, याज्या - ये ता॑तृ॒पुर्दे॒व॒त्रा, ह॒व्य॒वाह॑म॒जर॑" (ब्रा.२-६-१६-(१७,१८) | | अग्निः स्विष्टकृत् |
| सं.३-१-११ | सं.२-४-६ (पशुकामस्य चित्राख्यो यागः)<br>प्रैवाग्ने॒येन॑ वापयति...(२) स॒प्तैतानि॑ ह॒वीꣳषि॑ भवन्ति (३) | |
| अ॒ग्निना॑ र॒यिं, गोमा॑ꣳ अग्ने (१,२) | प्रथमस्य हविषः आग्नेयस्य (पुरोनुवाक्या, याज्या) | अग्निः |
| आप्या॑यस्व★, सं ते" ★ (३,४) | द्वितीयस्य हविषः सोमस्य | सोमः |

| | | |
|---|---|---|
| सं.३-१-११ इह त्वष्टारं, तन्नस्तुरीपं (५,६) | तृतीय हविषः त्वाष्ट्रस्य | त्वष्टा |
| शिवस्त्वष्टः, पिशङ्गरूपः (७,८) | विकल्पिता पुरोनुवाक्या, याज्या | त्वष्टा |
| प्रणो देवी★, आ नो दिवः★ (९,१०) | चतुर्थस्य सरस्वती देवताकस्य | सरस्वती |
| पीपिवाꣳसꣳ, ये ते सरस्वः (११,१२) | पञ्चमस्य सरस्वद् देवताकस्य (पुरोनुवाक्या, विकल्पिता पुरोनुवाक्या) | सरस्वान् |
| यस्य व्रतं, दिव्यꣳ सुपर्णं (१३,१४) | याज्या, विकल्पिता याज्या | |
| सिनीवालि, या सुपाणिः (१५,१६) | षष्ठस्य सिनीवाली देवताकस्य | सिनीवाली |
| इन्द्रं वो विश्वतस्परि ★, इन्द्रं नरः★ (१७,१८) | ऐन्द्र उत्तमो भवति-इति सप्तमं हविः | इन्द्रः |
| असित वर्णाः, हिरण्य केशः, आ ते सुपर्णाः, वाश्रेव विद्युत्, पर्वतश्चित् (१९-२३) | अथासां धूममनुमन्त्रयते। | धूमः (मरुतः) |

अभि क्रन्द (२४) → कृष्णोऽश्वः पुरस्तात् प्रत्यङ्मुखोऽवस्थितो भवति,
तमेतेन वाससा अभि पिनष्टि अभिक्रन्देति। (सं.५-७-१-३ पश्यत)

| | | |
|---|---|---|
| त्वं त्या चिद्, अग्ने भूरीणि (२५.२६) | सं.२-४-१०-४ अग्नये धामच्छदे पुरोडाशं | अग्निः |
| दिवो नो वृष्टिं, पिन्वन्त्यपः (२७,२८) | मारुतꣳ सप्तकपालं | मरुतः |
| उदप्रुतो, घृतेन द्यावा (२९,३०) | विकल्पिता पुरोनुवाक्या, याज्या | |
| और्वभृगुवत्, आ सवꣳ, हुवे वातस्वनं (३३-३५) | पुरस्तात् स्विष्टकृतः स्रुवाहुतीः उपजुहोति और्व भृगुवद्..इति तिस्रः। | अग्निः |

| | | |
|---|---|---|
| सं.३-२-११ | सं.२-४-११ (त्रैधातवीष्टिः) सर्वा॑णि॒ छन्दा॑ꣳसि.. त्रै॒धा॒त॒वी॑येन यजेत.. प्रसो अग्न इति उष्णिह ककुभौ धाय्ये दधाति । | |
| प्र सो अ॑ग्ने (१) | प्रथमा धाय्या | |
| प्र हो॒त्रे पू॒र्व्यं (२) | द्वितीया धाय्या | |
| अग्ने॒ त्री ते॒ (३) | परिधानीया | अग्निः |
| सं वां॒ कर्म॑णा (४) | पुरोनुवाक्या | इन्द्राविष्णू॒ |
| उ॒भा जि॑ग्यथुः (५) | याज्या | |
| त्रीण्यायू॒ꣳषि (६) | स्विष्टकृतः पुरोनुवाक्या रूपा संयाज्या | अग्निः स्विष्टकृत् |
| अ॒ग्निस्त्रीणि॑ (७) | स्विष्टकृतः याज्या रूपा संयाज्या | |
| यक्षं॑च्च (८) | स्विष्टकृतः विकल्पित रूपा संयाज्या | |
| इन्द्रा॑विष्णू॒ (९) | प्रधान हविषः विकल्पिता पुरोनुवाक्या | इन्द्राविष्णू॒ |
| उ॒त मा॒ता (१०) | प्रधान हविषः विकल्पिता याज्या | |
| सं.३-३-११ इ॒दं वा॑मा॒स्ये॑", अ॒यं वा॒ परि॑षिच्यते (१,२) | सं.२-४-१३-२ तस्मा॑ ए॒तमैन्द्रा बार्हस्प॒त्यं पुरोनुवाक्या, याज्या | इन्द्राबृहस्पती |
| अ॒स्मे इ॑न्द्रा, बृ॒हस्पति॑र्नः (३,४) | विकल्पिता पुरोनुवाक्या, याज्या | |
| वि॒ते॒ विष्व॒ग्, त्वाम॑ग्ने॒ मानु॑षीः (५,६) | ब्रा.३-७-३-७(२१) यस्याहि॑ताग्नेर॒न्यै-र॒ग्निभि॑र॒ग्नयः॑ सꣳसृ॒ज्यन्ते॑" । अ॒ग्नये॒ विवि॑चये पुरोडाश॑म॒ष्टाक॑पालं॒ निर्व॑पेत् । इत्यत्र विविचीष्टौ पुरोनुवाक्या, याज्या । | अग्निः विविचिः |
| धा॒ता द॑दातु, धा॒ता प्र॒जाया॑ः (७,८) | सं.१-८-८-१ धा॒त्रे पु॑रो॒डाशं॒ द्वाद॑शकपालं॒ निर्व॑पति (देविकादिकर्म षट्कम्) पुरोनुवाक्या, याज्या | धाता |
| धा॒ता द॑दातु, धा॒ता द॑दातु (९,१०) | (विकल्पिता पुरोनुवाक्या, याज्या) | |
| अनु॑ नो॒ऽद्य, अन्विद॑नुमते (११,१२) | अनु॑मत्यै च॒रुं | अनुमतिः |
| अनु॑मन्यतां, यस्या॑मि॒दं (१३,१४) | (विकल्पिता पुरोनुवाक्या, याज्या) | |

| | | |
|---|---|---|
| सं.३-३-११ (१५,१६) राकामहं, यास्ते राके | राकायै चरुं | राका |
| सिनीवालि ★, या सुपाणिः★ (१७,१८) | सिनीवाल्यै चरुं | सिनीवाली |
| कुहूमहः, कुहूर्देवानां (१९,२०) | कुह्वै चरुं | कुहूः |

सं.३-४-९ देविका निर्वपेत् प्रजाकामः-- दीव्यन्ति अपेक्षितं फल विशेषं प्रकाशयन्तीति धात्रादयः पञ्चेष्टयः देविकाः। (सं.१-८-८- धात्रे पुरोडाशं-- तन्मन्त्राः धाता ददातु नः इत्यादि सं.३-३-११ (७-२०)
**'पूर्णे राका निशाकरे'** इत्युक्तत्वात् पूर्णचन्द्र मण्डलोपेता राका, सा च शुक्ल पक्ष स्वरूपा। **'नष्टेन्दु कला कुहूः'** इत्युक्तत्वात् चन्द्रकला लेशेनापि हीना कुहूः, सा च कृष्ण पक्षस्वरूपा। **'सा दृष्टेन्दुः सिनीवाली'** इत्युक्तत्वात् चतुर्दशीमिश्रिता कृष्ण पंचदशी सिनीवाली, सा च अत्र अमावास्या रूपत्वेन विवक्षिता। **'कलाहीने साऽनुमतिः'** इत्युक्तत्वात् चतुर्दशीमिश्रिता शुक्लपञ्चदशी अनुमतिः, सा च अत्र पौर्णमासी तिथिरूपत्वेन विवक्षिता। उक्तयोः पक्षयोः तिथ्योश्च निष्पादको यश्चन्द्रमाः सोऽत्र धातृ रूपेण विवक्षितः॥

---

| | | |
|---|---|---|
| सं.३-४-१० (१,२) वास्तोष्पते प्रति, वास्तोष्पते शग्मया | सं.३-४-१० (३-६) यत्सायं प्रातरग्निहोत्रं...वास्तोष्पतीयं जुहोति पुरोनुवाक्या, याज्या | वास्तोष्पतिः (रुद्रः) |
| सं.३-४-११ | सं.१-८-१० (राजसूये देवसुवां हवींषि) | |
| त्वमग्ने बृहद्वयः, हव्यवाडग्निः (१,२) | अग्नये गृहपतये पुरोडाशं... (१) | अग्निः (गृहपतिः) |
| त्वं च सोम नो, ब्रह्मा देवानां (३,४) | सोमाय वनस्पतये... | सोमः (वनस्पतिः) |
| आ विश्वदेवं, आ सत्येन रजसा (५,६) | सवित्रे सत्य प्रसवाय... | सविता |
| यथा नो अदितिः, मानस्तोके तनये (७,८) | रुद्राय पशुपतये... | रुद्रः |
| उदप्रुतो न वयो, हंसैरिव (९,१०) | बृहस्पतये वाचस्पतये... | बृहस्पतिः |

| | | |
|---|---|---|
| सं.३-४-११ एन्द्र सान॒सिꣳ, प्र स॑साहिषे (११,१२) | इन्द्रा॑य ज्ये॒ष्ठाय॑… | इन्द्रः |
| त्वꣳ सु॒तस्य॑, भुव॒स्त्वमि॑न्द्र॒ (१३,१४) | विकल्पिते पुरोनुवाक्यायाज्ये | |
| मि॒त्रस्य॑ चर्षणी, मि॒त्रो जनान्॒ (१५,१६) | मि॒त्राय॑ स॒त्याय॑… | मित्रः |
| प्र स मि॑त्र॒ मर्तो॑ अस्तु॒ (१७) | (विकल्पिता याज्या) | |
| यच्चि॒द्धि ते॒, यत्किंचे॒दं (१८,१९) | वरु॑णाय॒ धर्म॑पतये… | वरुणः |
| कि॒त॒वासो॒ (२०) | विकल्पिता याज्या | |
| सं.३-५-१ (१,२) पूर्णा प॒श्चादु॒त, यत्ते॑ दे॒वाः | सं.३-५-१(५..) आ॒दि॒त्याश्चाङ्गि॑रसश्च.. सा॒रस्व॒तौ होमौ॑ पु॒रस्ता॑ज्जुहुयात्॒ पुरोनुवाक्या याज्ये। (सरस्वती च सरस्वांश्च ययोर्होमयोः तौ सारस्वतौ।) | सरस्वान्, सरस्वती (अ॒मा॒वा॒स्या॑ वै सर॑स्वती पू॒र्णमा॑स॒ः सर॑स्वान्) |
| नि॒वेश॑नी, अग्नीषोमौ प्रथ॒मौ (३,४) | विकल्पिते पुरोनुवाक्या याज्ये ॥ (अग्नीषोमाविति अति शक्वरी) | |

**ब्राह्मण ग्रन्थे ब्रा.३-६ - अ॒ञ्जन्ति॒ त्वाम॑ध्व॒रे दे॑व॒यन्तः॑ इत्यत्र पाशुक हौत्र मन्त्राः प्रायेणोक्ताः, अवशिष्टाः अत्र अभि धीयन्ते ॥**

| | |
|---|---|
| सं.३-५-११ प्रदे॒वं दे॒व्या…. दीर्घ॑द्॒ बोधि गो॒पाः (१-८) | अष्टभिर्मन्त्रैः उत्तरवेदिं प्रति अग्निं प्रणयेत् ॥ |

अ॒भि त्वा॑ देव… ध॒न॒ञ्ज॒यꣳ रणे॑ रणे (९-१३) पञ्च मन्त्राः अग्नि मन्थने पठनीयाः ॥

उ॒त ब्रु॑बन्तु, आ यꣳ हस्ते॒ (१४,१५) - वह्नौ जाते ऋग्द्वयं होता पठेत् ॥

प्र दे॒वं दे॒ववीतये..सा॒ध्याः सन्ति॑ दे॒वाः ॥ (१६-२१) अस्याग्नेः पूर्वाग्निना सह मेलने, षट् ऋचः होता पठेत् ॥

सं.४-१-८-(१-१२) ऊर्ध्वा अस्य... विश्वेदेवा हविरिदं जुषन्ताम् इति द्वादश ऋचः आप्रियः याज्या पुरोनुवाक्याः, प्रयाजानां आप्रियो भवन्ति। प्रयाजानां सर्वेषां अग्नि विशेषा एव देवताः ॥

सं.४-१-८-१३ हिरण्यगर्भः समवर्तताग्रे - सं.५-५-१-६ हिरण्यगर्भः समवर्तताग्र इत्याघारमाघारयति।

| | | |
|---|---|---|
| सं.४-१-८-(१४-१९)<br>यः प्राणतो, य आत्मदाः,<br>यस्येमे हिमवन्तो, यं क्रन्दसी<br>अवसा, येन द्यौरुग्रा,<br>आपो ह यन्महतीः | यः प्राणतो य आत्मदा इति प्राजापत्यस्य -<br>यः पशुः प्राजापत्यः तस्यैते याज्यानुवाक्ये<br>इत्यर्थः। तत्र वपायां द्वे ऋचौ, पुरोडाशे द्वे<br>ऋचौ, हविषि द्वे ऋचौ इति षडृचः। | प्रजापतिः |
| यश्चिदापो महिना (२०) | विकल्पिता याज्या। | |

| | | |
|---|---|---|
| सं.४-१-११ | सं.१-८-२ चातुर्मास्य गत वैश्वदेव पर्वणि याज्यापुरोनुवाक्याः | |
| अग्ने यं यज्ञं (१) | प्रथमस्य आज्यभागस्य पुरोनुवाक्या | अग्निः |
| सोम यास्ते (२) | द्वितीयस्य आज्य भागस्य पुरोनुवाक्या | सोमः |
| अग्निर्मूर्धा ★, भुवः ★(३,४) | आग्नेयमष्टाकपालं | अग्निः |
| (५,६) त्वं नः सोम ★,<br>या ते धामानि ★ | सौम्यं चरुं | सोमः |
| तत्सवितुः, अचित्ती<br>यच्चकृमा(७,८) | सावित्रं द्वादशकपालं | सविता |
| चोदयित्री, पावीरवी कन्या<br>(९,१०) | सारस्वतं चरुं | सरस्वती |
| पूषा गा अन्वेतु, शुक्रं ते अन्यत्<br>(११,१२) | पौष्णं चरुं | पूषा |
| तेऽवर्धन्त, प्रचित्रमर्कं (१३,१४) | मारुत९ सप्त कपालं | मरुतः |
| विश्वे देवाः ★, विश्वे देवाः★<br>(१५,१६) | वैश्वदेवीमामिक्षाँ | विश्वे देवाः |
| द्यावा नः पृथिवी, प्रपूर्वजे<br>(१७,१८) | द्यावापृथिव्यमेककपालम् | द्यावापृथिवी |

| | | |
|---|---|---|
| सं.४-१-११ (१९,२०)<br>अ॒ग्निँ स्तोमे॑न, स ह॒व्य॒वाट् | स्विष्टकृतः । | अग्निः स्विष्टकृत् |
| शन्नो॑ भवन्तु ★, वाजे॑वाजे ★ (२१,२२) | तै.ब्रा.१-६-३ -२१ 'वा॒जिने॑ यजति' इति विहिते कर्मणि याज्यानुवाक्ययोः प्रतीके | |

सं.१-८-३ चातुर्मास्येषु द्वितीये वरुणप्रघास पर्वणि पुरोनुवाक्या याज्याः

| | | |
|---|---|---|
| सं.४-२-११ (१,२)<br>इन्द्रा॑ग्नी रोच॒ना, श्नथ॑द्वृत्रं | ऐ॒न्द्रा॒ग्नमेका॑दशकपालं | इन्द्राग्नी |
| प्रच॑र्ष॒णिभ्यः॑ (३) | विकल्पिता याज्या | |
| मरु॑तो॒ यस्य॒ हि (४)<br>य॒ज्ञैर्वा॑ यज्ञवाहसो (५)<br>श्रि॒यसे॒ कं भा॒नुभिः॑ (६) | मा॒रु॒तीमा॒मिक्षां॓ .... पुरोनुवाक्या<br>विकल्पिता पुरोनुवाक्या<br>याज्या | मरुतः |
| अव॑ ते॒ हेड॒ ★ उदु॑त्त॒मं (७,८)★ | वा॒रु॒णीमा॒मिक्षां॓ | वरुणः |
| कया॑ नश्चि॒त्रः, को अ॒द्य यु॑ङ्क्ते (९,१०) | का॒यमेक॑कपालम् | कः (प्रजापतिः) |
| अग्ने॒ नय॑ ★, आ दे॒वानां॓ ★ (११-१२) | स्विष्टकृतः | अग्निः स्विष्टकृत् |
| शं नो॑ भवन्तु ★, वाजे॑वाजे ★ (१३,१४) | आमिक्षा निष्पादिनः वाजिनः हविषः | वाजिनः |
| अ॒प्स्व॑ग्ने, वृषा॑ सोम (१५,१६) | अवभृथे प्रथम, द्वितीय आज्यभागयोः पुरोनुवाक्या | अग्निः, सोमः |
| इ॒मं मे॑ वरुण ★, तत्त्वा॑ यामि ★(१७,१८) | वारुणस्य | वरुणः |
| त्वं नो॑ अग्ने ★,<br>स त्वं नो॑ अग्ने ★ (१९,२०) | अग्निवारुणस्विष्टकृतः | अग्नीवरुणौ |

| | | |
|---|---|---|
| सं.४-३-१३ | सं.१-८-४ चातुर्मास्येषु तृतीयं साकमेध पर्व | |
| अ॒ग्निर्वृ॒त्राणि॑, त्वꣳसो॑मासि (१,२) | अ॒ग्नये॑ऽनी॑कवते... प्रथम द्वितीय आज्यभागयोः पुरोनुवाक्या | अग्निः, सोमः |
| भ॒द्रा ते॑ अग्ने, भ॒द्रं ते॑ अग्ने (३,४) | (अग्नेरनीकवतः हविषः) पुरोनुवाक्या, याज्या | अग्निः |
| सैनानी॑केन (५) | विकल्पिता याज्या | (अनीकवान्) |
| स्व॒स्ति नो॑ दि॒वो, यथा॑ होतः (६,७) | स्विष्टकृतः | अग्निः स्विष्टकृत् |
| अ॒ग्निमी॑डे, वृषा॑ सोम (८,९) | मरुद्भ्यः सान्तप॒नेभ्यः॑ प्रथम द्वितीय आज्य भागयोः पुरोनुवाक्या | अग्निः, सोमः |
| सान्त॑पनाः, यो नो॒ मर्तः॑ (१०, ११), सं॒व॒त्स॒रीणाः᳚ (१२) | (प्रधान हविषः) विकल्पिता याज्या | मरुतः सान्तपनाः |
| पि॒प्री॒हि दे॒वाꣳ, अग्ने॒ यद॒द्य (१३,१४) | (स्विष्टकृतः) | अग्निः स्विष्टकृत् |
| अ॒ग्निना॑ र॒यिं, ग॒य॒स्फानो॑ (१५,१६) | म॒रुद्भ्यो॑ गृह मे॒धिभ्यः॑ प्रथम द्वितीय आज्य भागयोः पुरोनुवाक्या | अग्निः, सोमः |
| गृह॑मेधासः, पू॒र्वीभि॒र्हि (१७,१८) प्रबु॒ध्नियाः᳚ (१९) | प्रधान हविषः विकल्पिता याज्या | मरुतः गृहमेधिनः |
| उप॒ यमेति॑, इ॒मो अ॑ग्ने (२०,२१) | (स्विष्ट कृतः) | अग्निः स्विष्टकृत् |
| क्री॒डं व॒ः शर्धो॒, अत्या॑सो॒ न (२२,२३) प्रैषा॒मज्मे॑षु, उ॒प॒ह्व॒रेषु॒ (२४,२५) | सं.१-८-४ म॒रुद्भ्यः॑ क्री॒डिभ्यः॑ (प्रधान हविषः) पुरोनुवाक्या याज्ये विकल्पिते पुरोनुवाक्या याज्ये | मरुतः क्रीडिनः |
| अ॒ग्निर्म॑ग्नि॒ꣳ, तꣳहि शश्व॑न्तः (२६,२७) | स्विष्टकृतः | अग्निः स्विष्टकृत् |
| इन्द्रा᳚ग्नी रोच॒ना ★, श्नथ॑द्वृ॒त्रं ★(२८,२९) | ऐ॒न्द्रा॒ग्नमेका॑दशकपालं | इन्द्राग्नी |

| | | |
|---|---|---|
| सं.४-३-१३ इन्द्रं वो विश्वतः★, इन्द्रं नरः ★(३०,३१) | ऐन्द्रं चरुं | इन्द्रः |
| विश्वकर्मन् हविषा ★, विश्वकर्मन् हविषा वर्धनेन ★(३२,३३) | वैश्वकर्मणमेककपालम् | विश्वकर्मा |
| सं.४-४-१२ | सं.७-५-१४ सर्वपृष्ठेष्टिः - पुरोनुवाक्या, याज्या | |
| समिद्दिशां, रथन्तरꣳ (१,२) | अग्नये गायत्राय | अग्निः |
| उग्रा दिशां, बृहत् साम (३,४) | इन्द्राय त्रैष्टुभाय | इन्द्रः |
| प्राची दिशां, वैरूपे सामन् (५,६) | विश्वेभ्यो देवेभ्यो | विश्वे देवाः |
| धर्त्री दिशां, वैराजे सामन् (७,८) | मित्रावरुणाभ्यामानुष्टुभा.. | मित्रावरुणौ |
| सम्राट् दिशां, सुवर्वती (९,१०) | बृहस्पतये पाङ्क्ताय | बृहस्पतिः |
| ऊर्ध्वा दिशाꣳ, स्तोमत्रयस्त्रिꣳशे (११,१२) | सवित्र आतिच्छन्दसाय | सविता |
| ध्रुवा दिशां, विष्टंभो दिवो (१३,१४) | अदित्यै विष्णुपत्न्यै | अदितिः विष्णुपत्नी |
| वैश्वानरो नः★, पृष्टो दिवि ★ (१५,१६) | अग्नये वैश्वानराय | अग्निः वैश्वानरः |
| अनुनोऽद्यानुमतिः ★, अन्विदनुमते ★ (१७,१८) | अनुमत्यै चरुः | अनुमतिः |
| कया नश्चित्रः ★, को अद्य युङ्क्ते ★ (१९,२०) | काय एककपालः | कः (प्रजापतिः) |
| सं.४-७-१५ | सं.७-५-२२ मृगारेष्टिः | |
| अग्नेर्मन्वे...अꣳहसः (१) यस्येदं प्राणं...अꣳहसः (२) | अग्नयेऽꣳहोमुचेऽष्टाकपालः | अग्निः (अꣳहोमुक्) |
| इन्द्रस्य मन्ये...अꣳहसः (३) यःसंग्रामं नयति.. अꣳहसः(४) | इन्द्रायाꣳहोमुच एकादशकपालः | इन्द्रः (अꣳहोमुक्) |

| | | |
|---|---|---|
| सं.४-७-१५ म॒न्वे वां᳚<br>मित्रा...आग॑सः (५)<br>यो वा॒ᳲ रथ॑...आग॑सः (६) | मि॒त्रावरु॑णाभ्यामागो॒मुग्भ्यां᳚<br>पय॒स्यां᳚ | मित्रावरुणौ<br>(आगोमुचौ) |
| वा॒योः स॑वि॒तुः...आग॑सः (७)<br>उप॒ श्रेष्ठा॑ नः... आग॑सः (८) | वा॒यो॒सा॒वि॒त्र आ॑गो॒मुग्भ्यां᳚ च॒रुः | वायुसवितारौ<br>(आगोमुचौ) |
| र॒थीत॑मौ र॒थीनां॑...आग॑सः (९)<br>यदया॑तं वह॒तुᳲ...आग॑सः (१०) | अ॒श्विभ्या॑मागो॒मुग्भ्यां᳚ धा॒नाः | अश्विनौ<br>(आगोमुचौ) |
| म॒रुतां᳚ मन्वे॒...एन॑सः (११)<br>ति॒ग्ममायु॑धं...एन॑सः (१२) | म॒रुद्भ्यं॑ एनो॒मुग्भ्यः॑ स॒प्त क॑पालः | मरुतः<br>(एनोमुचः) |
| दे॒वानां᳚ मन्वे॒... एन॑सः (१३)<br>यदि॒दं मा॑ऽभि॒...एन॑सः (१४) | विश्वे॑भ्यो दे॒वेभ्यं॑ एनो॒मुग्भ्यो॒<br>द्वाद॑शकपालः | विश्वे देवाः<br>(एनोमुचः) |
| अनु॑नो॒ऽद्यानु॑मतिः ★ (१५)<br>अन्विद॑नुमते॒ त्वं ★(१६) | अनु॑मत्यै च॒रुः | अनुमतिः |
| वै॒श्वा॒न॒रो न॑ ऊ॒त्या ★(१७)<br>पृ॒ष्टो दि॒वि ★(१८) | अ॒ग्नये॑ वैश्वान॒राय॒ द्वाद॑शकपालः | अग्निः<br>वैश्वानरः |
| ये अप्र॑थेतां॒...अᳲह॑सः (१९)<br>ऊ॒र्वी॑ रोदसी॒...अᳲह॑सः (२०) | द्यावा॑पृथि॒वीभ्या॑मᳲहो॒मुग्भ्यां᳚<br>द्विकपा॒लः | द्यावापृथिवी |
| यत्ते॑ व॒यं पु॑रुष॒त्रा (२१)<br>यथा॑ ह॒ तद्व॑सवो (२२) | स्विष्टकृतः पुरोनुवाक्या, याज्या | अग्निः<br>स्विष्टकृत् |

| स.५-१-११ | ब्रा.३-९-४-२२(८) |
|---|---|
| समि॑द्धो अ॒ञ्जन् कृद॑रं मती॒नां | समि॑द्धो अ॒ञ्जन् कृद॑रं मती॒नामित्यश्व॑स्या॒प्रियो॑ भवन्ति सरू॒पत्वाय॑ ।<br>(अश्वस्याप्रियः प्रयाज याज्याः) |

| | | |
|---|---|---|
| ब्रा. १-४-२-१,२<br>युव९ सुराममश्विना ।---<br>पुत्रमिव पितरावश्विनोभा । --- | ब्रा.१-८-३ युव९ सुराममश्विनेति सर्व देवत्ये याज्यानु वाक्ये भवतः ।<br>(सर्व देवत्यत्वं आश्विनादि त्रयवत्वात्)<br>॥ अश्विनौ, इन्द्रः, सरस्वती ॥ | |
| सं.१-८-३-३,४<br>मो षू ण इन्द्र, यद्ग्रामे यदरण्ये | ब्रा.१-६-५-७,८ यत्पत्नी पुरोनुवाक्यामनु ब्रूयात्, यद् ग्रामे यदरण्य इत्याह । | इन्द्रः |
| सं.१-८-४-२,३<br>पूर्णा दर्वि परा पत,<br>देहि मे ददामि ते | आपस्तम्बः - …पूर्णादर्वि परापतेत्यनुद्रुत्य उत्तरया गार्हपत्ये जुहुयात् … ॥<br>पूर्णेत्यनूच्य देहीति याज्यामध्वर्युरीरयेत् ॥ | इन्द्रः |
| सं.४-४-४-(२२-२५)<br>अग्ने तमद्याश्वं न स्तोमैः,<br>अधा ह्यग्ने क्रतोर्भद्रस्य,<br>आभिष्टे अद्य गीर्भिः,<br>एभिर्नो अर्कैर्भवा नः | सं.१-५-२-२ पङ्क्त्यो याज्यानुवाक्या भवन्ति - द्वे अग्न्याधेयस्य याज्यानु वाक्ये,<br>द्वे स्विष्टकृतः । (भट्ट भास्करः)<br>(सं.३-५-४-१४ पङ्क्त्यौ याज्यानुवाक्ये भवतः) | अग्निः<br>अग्निः स्विष्टकृत् |
| सं.४-६-५-(६,७) नक्तोषासा समनसा, अग्ने सहस्राक्ष | सं.५-४-७ नक्तोषासेति पुरोनुवाक्यामन्वाह | अग्निः |

**ब्रा.२-४, २-५**

**उपहोमा अछिद्र काण्डमिति लिङ्ग विनियोज्यानि । ततः श्रौते स्मार्ते वा यत्र मन्त्रापेक्षा, तत्र तदुचित लिङ्गं पर्यालोच्य स मन्त्रः बुद्धिमद्भिः विनियोजनीयः । यत्र विनियोगो नोपलभ्यते तत्र लिङ्गानुसारात् तद्देवता युक्ते कर्मणि समाख्या बलात्, उपहोमार्था मन्त्राः ।**

| | | |
|---|---|---|
| ब्रा.२-४-१<br>१ जुष्टो दमूना अतिथिर्दुरोणे । | यज्ञियात् काष्ठात् अग्निं मथित्वा श्रोत्रियागाराद्वा आहृत्य व्याहृतिभिः नियुज्य उपसमाधाय उपतिष्ठते जुष्टो दमूना इति । | अग्निः |
| २ अग्ने शर्धं महते सौभगाय | वैमृधेष्टौ स्विष्टकृतः पुरोनुवाक्या | अग्निः स्विष्टकृत् |
| ३,४ अग्ने यो नोऽभितो जनः, अग्ने यो नोऽभि दासति | एताः चतस्रः आग्नेयकर्मणि विनियोज्याः । | अग्निः |
| ५-८ त्वमिन्द्राभि भूरसि, अप प्राच इन्द्र, तमिन्द्रं वाजयामसि, युजेरथं गवेषण१ हरिभ्याम् | चत्वारः ऐन्द्र कर्मणि विनियोज्याः । युजेरथमिति मन्त्राः संहितायां ऐन्द्रमिति विहिते पशौ वपायां याज्यात्वेनापि विनियुक्तः । | इन्द्रः |
| ९,१० हव्यवाहमभिमातिषाहम्, स्विष्टमग्ने अभि तत्पृणाहि | ‘अग्नये तन्तुमते अष्टाकपालं निर्वपेत्’ इत्यस्यामिष्टौ संयाज्या रूपेण विनियोग आपस्तंबेनोक्तः । बोधायनस्तु नक्षत्रेष्टिषु विनियोगं उदाजहार ‘स्विष्टवत्यौ संयाज्ये हव्यवाह१ स्विष्टम्’ इति | अग्निः / अग्निः स्विष्टकृत् ब्रा.३-१-३ |
| ११ त्वामग्ने हविष्मन्तः | काम्येष्टिषु विकल्पित संयाज्यारूपेण विनियोगं आपस्तम्ब उदाजहार । | अग्निः |
| १२ विश्वानि नो दुर्गहा जातवेदः | क्वापि आग्नेये कर्मणि विनियोक्तव्यः | अग्निः |
| १३ पूषा गा अन्वेतु नः । | वृषोत्सर्गे विनियोगं बोधायन आह (पुरोनुवाक्या) | पूषा |
| १४ पूषेमा आशा अनुवेद सर्वाः | ‘पौष्ण१ श्याममालभेत’ (सं २-१-६-३)इत्यस्य पशोः पुरोडाशस्य याज्या रूपेण विनियोगः | पूषा |

| | | |
|---|---|---|
| ब्रा.२-४-१<br>१५ त्वम॑ग्ने स॒प्रथा॑ असि | ब्राह्मणे 'यस्यानो॑ वा॒ रथो॑ वाऽन्त॒राग्नी याति॑' इत्युपक्रम्य अन्ते मन्त्रोऽयं उदाहृतः त्वम॑ग्ने स॒प्रथा॑ अ॒सीत्या॑ह। | अग्निः |
| १६ अ॒ग्नी रक्षा॑ꣳसि सेधति | आपस्तम्बः अग्नी रक्षांसीति उपक्रम्य दर्शयति 'शुचिः पावक ईड्यः' इत्यरणी अभिमन्त्र्य। | अग्निः |
| १७ अग्ने॒ रक्षा॑णो॒ अꣳह॑सः<br>१८ अग्ने॒ हꣳसि॒ न्य॑त्रिण॑म्॒ | एतयोः मन्त्रयोः पूर्वेण मन्त्रेण सह बोधायन उदाजहार- यदि मथ्यमानो न जायेत, राक्षोघ्नीरनुब्रूयात् कृणुष्व पाज इति पञ्च, अग्नी रक्षांसि सेधति इति तिस्रः ॥ | अग्निः |
| १९ आवा॑त वाहि भेष॒जम्॒<br>२० द्वावि॒मौ वातौ॑ वातः<br>२१ यद॒दो वा॑त ते गृ॒हे<br>२२ वात॒ आवा॑तु भेष॒जम्॒ | मन्त्र चतुष्टयम् कस्मिंश्चित् वायव्ये कर्मणि विनियोज्यम्। | वायुः (वातः) |
| २३ त्वम॑ग्ने अ॒यासि॑ | सर्व प्रायश्चित्तानि जुहोति | अग्निः अयाः |
| २४ इ॒ष्टो अ॒ग्निराहु॑तः | आग्नेय कर्मणि विनियोगः | अग्निः |
| २५ कामो॑ भूतस्य॒ भव्य॑स्य<br>२६ काम॒स्तदग्रे॒ सम॑वर्त॒ताधि॑ | एतन्मन्त्रद्वयं दिवः श्येनीषु द्वितीयस्यामिष्टौ याज्यानु वाक्या रूपेण विनियोजनीयम्<br>ब्रा.३-१२-१-(७,८)<br>ब्रा.३-१२-२-४ तं कामो॑ब्रवीत्।.... | कामः |
| २७ त्वया॑ मन्यो स॒रथ॑मारु॒जन्तः॑<br>२८ म॒न्युर्भगो॑ म॒न्युरे॒वास॑ दे॒वः | एतन्मन्त्रद्वयं मन्यु देवताके कर्मणि विनियोजनीयम्। तादृशं कर्म नरमेधे श्रूयते म॒न्यवेऽयस्ता॒पम् इति। अयस्तापं लोहकारं पुरुषं मन्यु देवतार्थमालभेतेत्यर्थः।<br>ब्रा.३-४-१०-१ | मन्युः |
| २९ त्वम॑ग्ने व्रत॒ भृच्छुचि॑ः<br>३० व्र॒तानु बिभ्र॑द् व्र॒तपा अदा॑भ्यः | एतच्च मन्त्रद्वयं औपवसथ्येऽहनि अश्रुपात प्रायश्चित्तेष्टौ याज्यानु वाक्यारूपेण आपस्तंबो विनियुक्तवान्। | अग्निः |

## ब्रा.२-४-२

१ चक्षु॑षे हे॒ते मन॑सो हेते

२ यो मा॒ चक्षु॑षा॒ यो मन॑सा

३ यत्किंचा॒सौ मन॑सा॒ यच्च॑ वा॒चा

४ या॒तु॒धाना॒ निर्ऋ॑ति॒रादु॒रक्षः॑

५ हन्मि॑ ते॒ऽहं कृ॒त९ ह॒विः

६ अप॑नह्यामि ते बा॒हू ।

७ पु॒राऽमुष्य॑ वषट्का॒रात्

८ अन्ति॑ दू॒रे स॒तो अ॑ग्ने

९ यो मा॒ नक्तं॑ दिवा॑ सा॒यम्

... भ्रातृ॑व्यं पादयामसि इत्यन्तं ॥ एते नवमन्त्राः 'एतयैव यजेताभिचर्यमाणः' (सं.२-२-९-३) इत्यादिषु इष्टिषु उपहोमार्थत्वेन विनियोक्तव्याः ॥ उदक शान्ति जपे विनियुज्यते ॥

| | | |
|---|---|---|
| १० इन्द्र॑स्य गृ॒हो॑ऽसि॒ तं त्वा॑ । | अयं मन्त्रः आत्म रक्षायां विनियोक्तव्यः | |
| ११ ईडे॑ अ॒ग्निं वि॑प॒श्चित॑म् ।<br>१२ अग्ने॑ श॒केम॑ ते व॒यम् । | एतच्च मन्त्रद्वयं आग्नेयकर्मणि विनियोज्यम् । | अग्निः |
| १३ अव॑तं मा॒ सम॑नसौ॒ समो॑कसौ। | आहवनीय मथिताग्न्योः मेलने विनियोक्तव्यः । | |
| १४ स्व॒यं कृ॑ण्वा॒नः सु॒गमप्र॑यावम् ।<br>१५ त्वं न॒स्तन्तु॑रु॒त सेतु॑रग्ने । | तदेतन्मन्त्रद्वयं प्रायश्चित्तेष्टौ याज्यानुवाक्या रूपेण सूत्रकारो विनियुक्तवान् 'यस्याग्निहोत्रं विच्छिद्येत द्व्यहे त्र्यहे चतुरहे वा अग्नये तन्तुमते अष्टाकपालं निर्वपेत् स्व॒यं कृ॑ण्वा॒नः' इति | अग्निः तन्तुमान् |
| १६ उदु॑त्त॒मं मु॑मुग्धि नः । | अयं मन्त्रः बन्धन मोक्षे विनियोज्यः । | |
| १७ व॒य९ सो॑म व्र॒ते तव॑ । | अस्य मन्त्रस्य अग्न्युपस्थाने मुखमार्जने विनियोगं सूत्रकार आह-'अशीमहीति मुखं विमृष्टे' इत्यन्तेन । | |
| १८ इ॒न्द्रा॒णी दे॒वी सु॒भगा॑ सु॒पत्नी॑<br>१९ सेना॑ ह॒ नाम॑ पृथि॒वी ध॑नञ्ज॒या । | एते ऋचौ 'इन्द्राण्यै चरुं निर्वपेत्'(सं.२-२-८-२) इत्यत्र विकल्पिते याज्यानुवाक्ये । | इन्द्राणी |

२० आ त्वा॑ हार्ष॒म॒न्तर॑भूः ।

२१ ध्रु॒वा द्यौर्ध्रु॒वा पृ॑थि॒वी ।

२२ इ॒है॒वैधि॒ मा व्य॑थिष्ठाः ।

पर्व॑त इ॒वावि॑चाचलिः ।

२३ अ॒भिति॑ष्ठ पृतन्य॒तः ।

२४ इन्द्रं॑ एणमदीधरत् ।

एताः पञ्च ऋचः 'इन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं निर्वपेदपरुद्धो वाऽपरुध्यमानो वा' (सं.२-२-८-८) इत्यत्र उपहोमार्था द्रष्टव्याः ।

**ब्रा.२-४-३**

| | | |
|---|---|---|
| १ जुष्टी॑ नरो॒ ब्रह्म॑णा वःपि॒तॄ॒णाम्। | अयं मन्त्रः रक्षार्थे द्रष्टव्यः। | |
| २ पा॒व॒का नः॒ सर॑स्वती। | अयं मन्त्रः अंगहीन पशूपाकरण प्रायश्चित्तत्वेन सूत्रे विनियुक्तः। | |
| ३ सर॑स्वत्य॒भि नो॑ नेषि॒ वस्यः॑। | सा॒र॒स्व॒तीं मे॒षीमाल॑भेत- सं.२-१-२-११- इत्यस्य पशोः हविषः पुरोनुवाक्या रूपेण प्रतीकं आम्नातम् (ब्रा.२-८-२-२९) (अस्य मन्त्रस्य ब्राह्मणं संहितायां वर्तते (सं.७-२-७-(९-१०)) ॥) | सरस्वती |
| ४ वृ॒ञ्जे ह॒विर्नम॑सा ब॒र्हिर॒ग्नौ। | अयं मन्त्रः क्वचित् याजमानजपे विनियोक्तव्यः | |
| ५ इ॒हार्वाञ्च॒मति॑ह्वये।<br>६ अ॒र्वाञ्च॒मिन्द्र॑म॒मुतो॑ हवामहे। | एते ऋचौ कस्मिंश्चित् जयहेतावैन्द्रे हविषि याज्यानुवाक्ये द्रष्टव्ये। | इन्द्रः |
| ७ अस॑मृष्टो जायसे मातृ॒वोः शुचि॑ः | अयं मन्त्रः मथन जन्याग्न्यभिमन्त्रणे क्वचित् विनियोक्तव्यः। | |
| ८ अ॒ग्निरग्रे॑ प्रथ॒मो दे॒वता॑नाम्<br>९ अ॒ग्निश्च॑ विष्णो॒ तप॑ उत्त॒मं म॒हः। | एतच्चोभयं दीक्षणीयामिष्टौ याज्यानुवाक्या रूपेण विनियोज्यम्। | अग्निः विष्णुश्च |
| १० प्रतद्विष्णु॑ः स्तवते वी॒र्या॑य।<br>११ नूमर्तो॑ दयते सनि॒ष्यन् यः।<br>१२ विच॑क्रमे पृथि॒वीमे॒ष ए॒ताम्।<br>१३ त्रिर्दे॒वः पृ॑थि॒वीमे॒ष ए॒ताम्। | एतेषां मन्त्राणां ‘वैष्णवं वामनमालभेत’ (सं.२-१-३-२) इत्येतस्य पशोः सूक्ते प्रतीकान्याम्नातानि (ब्रा.२-८-३(९-१२)। नूमर्तः इति मन्त्रस्तु प्रतद्विष्णुरित्यनेन विकल्प्यते ॥ | विष्णुः |
| १४ होता॑रं चि॒त्रर॑थमध्व॒रस्य॑। | अयं मन्त्रः आतिथ्येष्टौ स्विष्टकृतः पुरोनुवाक्या | |
| १५ आनो॒ विश्वा॑भिरू॒तिभि॑ः<br>१६ इन्द्र॑ः सु॒वर्षा ज॒नय॒न्नहा॑नि। | एते ऋचौ कस्मिंश्चिदैन्द्रे कर्मणि याज्यानुवाक्ये। | इन्द्रः |
| १७ अश्वि॑ना॒वव॑से॒ निह्व॑ये वाम्।<br>१८ अ॒वि॒ष्टं धी॒ष्वश्वि॑ना न आ॒सु। | एते ऋचौ आश्विने कर्मणि याज्यानुवाक्ये। | अश्विनौ |

| | | |
|---|---|---|
| <u>२-४-३</u><br>१९ त्व१ँ सो॑म क्रतु॑भिः सु॒क्रतु॑र्भूः ।<br>२० अषा॑ढं यु॒त्सु पृत॑नासु॒ पप्रि॑म् । | एतयोः ऋचोः, 'सौम्यं बभ्रुं ज्योगामयावी' (सं.२-१-१-१५) इत्यस्य पशोः सूक्ते (ब्रा.२-८-३-(२-३)) प्रतीकद्वयं आम्नातम् ॥ | सोमः |
| २१ भवा॑ मि॒त्रो न शेव्यः॑<br>२२ यः पू॒र्व्याय॑ वे॒धसे॒ नवी॑यसे ।<br>२३ तमु॑ स्तोतारः पू॒र्व्यं यथा॑ वि॒दः | एतास्तिस्रः ऋचः वैष्णवे कर्मणि उपहोमार्थाः ।<br>(२३ -विष्णोः नाम जपः ।) | विष्णुः |
| २४ इ॒मा धा॒ना घृ॒त॒स्नुवः॑ । | अयं मन्त्रः प्रातस्सवन उन्नीयमान सूक्ते अन्तर्भावनीयः । | |

ब्रा.२-४-३-२५ ए॒ष ब्र॒ह्मा प्रते॑ म॒हे । वि॒दथे॑ शꣳसिष॒ꣳ हरी॑ । य ऋ॒त्वियः॑ प्रते॑ वन्वे । व॒नुषो॑ ह॒र्यतं॒ मदम्॑ । इन्द्रो॒ नाम॑ घृ॒तं न यः । हरि॑भि॒श्चारु॒ सेच॑ते । श्रु॒ते ग॒ण आत्वा॑ विशन्तु । हरि॑वर्पसं॒ गिरः॑ ॥ द्वयोः ऋचोः व्यतिषक्त रूपोऽयं मन्त्रः । प्रयोगकाले तदुभयं व्यतिषज्य शंसनीयम् । अत एव व्यतिषज्याऽऽम्नातः । अर्थस्तु विभज्यैव अवबोद्धव्यः । तत्रैका द्विपदा अनुष्टुप् । 'ए॒ष ब्र॒ह्मा य ऋ॒त्वियः॑ । इन्द्रो॒ नाम॑ श्रु॒ते ग॒णे ॥' इति । अयं अच्छिद्र काण्डे समाम्नातः (ब्रा.३-७-९-१०) । जगत्याः पाठस्तु ''प्रते॑ म॒हे वि॒दथे॑ शꣳसिष॒ꣳ हरी॑ । प्रते॑ वन्वे व॒नुषो॑ ह॒र्यतं॒ मदम्॑ । घृ॒तं न यो हरि॑भि॒श्चारु॒ सेच॑ते । आ त्वा॑ विशन्तु॒ हरि॑वर्पसं॒ गिरः॑ ॥' इति । एतयोः ऋचोः व्यतिषंग पाठः केवलमदृष्टार्थ एवोपहोमेष्वाम्नातः । अयं च व्यतिषक्तो मन्त्रः विहृत षोडश स्तोत्रे अन्तर्भावनीयः ॥

| | | |
|---|---|---|
| ब्रा.२-४-३-<br>२६ आच॑र्षणि॒ प्रा वृ॑ष॒भो जना॑नाम् । | अयं च मन्त्रः सौत्रामण्यां ऐन्द्रस्य पशोर्वपायाः पुरोनुवाक्या । अत एव तत्र प्रतीकमाम्नातम् 'आचर्षणि प्रा विवेषयन्मा' इति (ब्रा.२-६-९) | इन्द्रः |

| | | |
|---|---|---|
| २७ प्रयत्सिंध॑वः प्रस॒वं यदाय॑न्<br>२८ ह्वया॑मसि॒ त्वेन्द्र॑ या॒ह्यर्वाङ् । | २९ इन्द्रा॑य सोमाः॑ प्र॒दिवो॒ विदा॑नाः। | ३० अहे॑डमान॒ उप॑ याहि य॒ज्ञम् ।<br>३१ या ते॑ का॒कुत्सुकृ॑ता॒ या वरि॑ष्ठा । |

एते पञ्च इन्द्र लिङ्गका मन्त्राः माध्यंदिन सवने शुक्रा मन्थि ग्रह प्रचारात्पूर्वं प्रस्थित याज्या द्रष्टव्याः ।

| | | |
|---|---|---|
| ३२ प्रा॒त॒र्युजा॒ विबो॑धय । | आश्विन ग्रहस्य पुरोनुवाक्या | अश्विनौ |
| ३३ प्रा॒त॒र्यावा॑णा प्र॒थ॒मा यं॑जध्वम् ।<br>३४ प्रा॒तर्यं॑जध्वम॒श्विना॑ हिनोत । | एते ऋचौ आश्विने कर्मणि विकल्पिते याज्ये । | अश्विनौ |

**ब्रा.२-४-४**

१ न॒क्तं॒ जा॒तास्यो॑षधे ।　　३ असि॑तं ते नि॒लय॑नम् ।　　५ सरू॑पा॒ नाम॑ ते मा॒ता ।

२ कि॒लास॑ं च पलि॒तं च॑ ।　　४ अ॒स्थि॒जस्य॑ कि॒लास॑स्य ।

एतेषां पञ्चानां मन्त्राणां श्वेतरोग (श्वेत कुष्ठ रोग) निवारण ओषधि अभिमन्त्रणे विनियोगो द्रष्टव्यः ।
नीलत्याख्य ओषधिः

| | | |
|---|---|---|
| ६ शु॒न॑हु॒वेम म॒घवा॑न॒मिन्द्र॑म् । | अयं मन्त्रः विजयार्थेन्द्रकर्मणि उप होमार्थः । | इन्द्रः |
| ७ धू॒नु॒थ द्यां पर्व॑तान्दा॒शु॒षे वसु॑ । प्रवे॑पयन्ति॒ पर्व॑तान् । | ८ एते ऋचौ "पृश्नि॑यै दु॒ग्धे प्रै॒यं॑गवं च॒रुं निर्व॑पेत्" (सं.२-२-११-५) इत्येतस्मिन् कर्मणि याज्यानुवाक्ये । | मरुतः |
| ९ पु॒रु॒त्रा हि स॒दृङ्ङसि॑ । १० स॒मत्स्व॒ग्निमव॑से । | विजयार्थाग्नेये कर्मणि द्रष्टव्यम् । | अग्निः |

११ सं॑गच्छध्व॒ं सं॑वदध्वम् ।　　१३ स॒मा॒नी व॒ आकू॑तिः ।　　१५ सं॒ज्ञानं॑ मे॒ बृह॒स्पति॑ः ।

१२ स॒मा॒नो मन्त्रः समि॑तिः　　१४ सं॒ज्ञानं॑ न॒ः स्वैः ।

एते पञ्च मन्त्राः यः स॑मा॒नैर्मि॑थो॒ विप्रि॑य॒ः स्यात् तमे॒तया॑ सं॒ज्ञान्या॑ याजयेत् (सं.२-२-११-६) इत्यस्मिन्कर्मणि द्रष्टव्याः।

| | | |
|---|---|---|
| १६ उप॑ च्छा॒यामि॑व॒ घृणे॑ः | अयं मन्त्रः आग्नेयकर्मणि द्रष्टव्यः । | अग्निः |
| १७ अद॑ब्धेभिः सवितः पा॒यु॒भि॒ष्ट्वम् । | अयं मन्त्रः सावित्रे कर्मणि द्रष्टव्यः । | सविता |
| १८ मदे॑ मदे॒ हि नो॑ द॒दुः । १९ शिप्रि॑न्वाजानां पते । | एतच्च मन्त्र द्वयं ऐन्द्रे कर्मणि द्रष्टव्यम् । | इन्द्रः |

२० यद्दे॑वा देव॒ हेड॑नम् ।　　२१ ऋतस्य॒र्तेना॑दित्याः ।　　२२ मेद॑स्वता॒ यज॑मानाः ।

२३ यदि॒ दिवा॒ यदि॒ नक्त॑म् ।　　२४ द्रु॒प॒दादि॒वेन्मु॑मुचा॒नः । (विश्वे)　　२५ उद्व॒यं तम॑स॒स्परि॑

षडृचः पापक्षयार्थे कर्मणि द्रष्टव्याः ।

<u>ब्रा.२-४-५</u>

१ वृषा॒ सो अ॒ꣳशुः प॑वते ३ यस्ते॑ शृङ्ग वृषो न पात् । ५ इन्द्रा॑य॒ गिरो॒ अनि॑शित सर्गाः ।

२ कस्य॒ वृषा॑ सु॒ते सचा᳚ । ४ तꣳस॒ध्रीचीरू॒तयो॒ वृष्णि॑यानि । ६ अक्षो॑दय॒च्छव॑सा॒ क्षाम॑ बु॒ध्नम् ।

१-६ ऐन्द्रे सौमिके कर्मणि द्रष्टव्याः । ४ तꣳसध्रीचीः इत्यस्य तु सौत्राामण्यामिन्द्रे पशावप्यस्ति विनियोगः (ब्रा.२-६-९-३) इन्द्रः देवता ।

| | | |
|---|---|---|
| ७ आ नो॑ अग्ने सुके॒तुना᳚ ।<br>८ त्वꣳ सो॑म म॒हे भग᳚म् । | एते उभे ऋचौ चातुर्मास्यान्तर्गत<br>महापितृ यज्ञ आज्य भागयोः पुरोनुवाक्ये<br>(सं.१-८-५-सोमा॑य पितृ॒मते᳚...) | अग्निः, सोमः |
| ९ रथं॑ युंजते म॒रुतः॑ शु॒भे सु॒गम् ।<br>१० वाच॒ꣳ॒ सुमि॑त्रावरुणा॒-<br>विरा॑वतीम् । | एतच्च मन्त्रद्वयं वृष्टिहेतौ मैत्रावरुण कर्मणि<br>द्रष्टव्यम् । | मित्रावरुणौ |
| ११ अयु॑क्त स॒प्त शु॒न्ध्युवः॑ ।<br>१२ वहि॑ष्ठेभिर्वि॒हर॑न् यासि॒ तन्तु᳚म् । | एतच्च मन्त्रद्वयं सौर्ये कर्मणि द्रष्टव्यम् । | सूर्यः |
| १३ प॒र्जन्या॑य॒ प्रगा॑यत ।<br>१४ अच्छा॑ वद त॒वसं॑ गी॒र्भिरा॒भिः ।<br>१५ यो गर्भ॒मोष॑धीनाम्<br>१६ तस्मा॒ इदा॒स्ये॑ ह॒विः । | मन्त्र चतुष्टयं पर्जन्य देवताके कर्मणि<br>द्रष्टव्यम् । अत एव सूत्रकारः<br>चातुर्मास्येष्वारंभणीयेष्टौ पर्जन्य चरुं विधाय,<br>तत्र पर्जन्यायेति मन्त्रद्वयं विनियुक्तवान् । | पर्जन्यः |
| १७ ति॒स्रो यद॑ग्ने श॒रद॒स्त्वामित् | अयं मन्त्रः आग्नेये कर्मणि द्रष्टव्यः | अग्निः |
| १८ इन्द्र॑श्च नः शुनासीरौ<br>१९ ययो॑रि॒दं विश्वं॒ भुव॑नमावि॒वेश॑ । | एतच्च मन्त्रद्वयं शुनासीर्ये कर्मणि<br>द्रष्टव्यम् । | शुनासीरौ |
| २० आ घा॒ ये अ॒ग्निमिं॑न्ध॒ते । | अनेन मन्त्रेण सुत्यादिने महारात्रे<br>बुद्ध्वा सदोऽभिमृशेत् | |
| २१ अग्न॒ इन्द्र॑श्च मे॒दिना᳚ ।<br>२२ याभ्या॒ꣳ॒ सुव॒रज॑य॒न्नग्र॑ ए॒व । | एतच्चोभयं ऐन्द्राग्ने कर्मणि द्रष्टव्यम् । | इन्द्राग्नी |

| | | |
|---|---|---|
| **ब्रा.२-४-६**<br>१ उ॒त नः॑ प्रि॒या प्रि॒यासु॑ ।<br>२ इ॒मा जु॒ह्वा॑ना यु॒ष्मदा नमो॑भिः । | एतदुभयं सारस्वते कर्मणि द्रष्टव्यम् ।'सा॒र॒स्व॒तीं मे॒षीमाल॑भेत' (सं.२-१-२-११) इति पशोः सूक्ते 'इ॒मा जु॒ह्वा॑ना' ब्रा.२-८-२-२७ इति प्रतीकम् । | सरस्वती |
| ३ त्रीणि॑ प॒दा वि च॑क्रमे । (त॒तो॒) | | विष्णुः |
| ४ तद॑स्य प्रि॒यम॒भि पाथो॑ अश्याम् । | विष्णु सूक्ते (ब्रा.२-८-३-८) प्रतीकम् | विष्णुः |
| ५ क्र॒त्वा॒ दा अ॑स्तु श्रेष्ठः॑ । | अयं मन्त्रः आग्नेये कर्मणि द्रष्टव्यः । | अग्निः |
| ६ इ॒मा ब्रह्म॑ ब्रह्मवाह । | अयं मन्त्रः सौर्ये कर्मणि द्रष्टव्यः । | सूर्यः |
| ७ उप॑ नः सू॒नवो॒ गिरः॑ । | अयं मन्त्रः मारुते कर्मणि द्रष्टव्यः । | मरुतः |
| ८ अ॒द्या नो॑ देव सवितः ।<br>९ विश्वा॑नि देव सवितः । | एतदुभयं सावित्रे कर्मणि द्रष्टव्यम् । | सविता |
| १० शुचि॑म॒र्कैर्बृह॒स्पति॑म् । | अयं मन्त्रः बार्हस्पत्ये कर्मणि द्रष्टव्यः । | बृहस्पतिः |
| ११ या धा॒रय॑न्त दे॒वाः सु॒दक्षा॒ दक्षं॑ | अयं मन्त्रः मैत्रावरुण शस्त्रे अन्तर्भावनीयः | मित्रावरुणौ |
| १२ स इ॑त्क्षेति॒ सुधि॑त॒ ओक॑सि॒ स्वे । | अयं मन्त्रः बार्हस्पत्ये कर्मणि द्रष्टव्यः । | बृहस्पतिः (इन्द्रः) |
| १३ सक्रू॑तिमिन्द्र॒ सच्यु॑तिम् ।<br>१४ वि न॑ इन्द्र॒ मृधो॑ जहि । | एतच्च मन्त्रद्वयं कन्यालाभार्थे कर्मणि विनियोज्यम् । | इन्द्रः |
| १५ प्र॒जाप॑तिः स्त्रि॒यां यशः॑ ।<br>१६ मोदः॑ प्रमो॒द आ॑न॒न्दः । | १७ मन॑सश्चि॒त्तमाकू॑तिम् ।<br>१८ यथा॒ऽहम॒स्या अतृ॑पᳲस्त्रि॒यै | १९ द॒दामीत्य॒ग्निर्व॑दति ।<br>२० आप॒स्तत्स॒त्यमाभ॑रन् |

मन्त्र षट्कस्य कन्याप्रतिग्रहे विनियोगमाह बोधायनः। आपस्तम्बानुसारिणस्तु वध्वाः शिरसि तण्डुलप्रक्षेपे विनियोगमाहुः ।

| | | |
|---|---|---|
| २१ न हि स्पश॒मवि॑दन्न॒न्यम॒स्मात् ।<br>२२ येषा॑मि॒मे पूर्वे॒ अर्मा॑स॒ आसन् । | एतच्चोभयं वैश्वानर देवत्ये कर्मणि द्रष्टव्यम् । | वैश्वानरः |
| २३ पृ॒थि॒वीं मा॒तरं॑ म॒हीम् ।<br>२४ विश्वं॑ बिभर्ति पृ॒थि॒वी । | एतच्च मन्त्रद्वयं लोकेष्टौ द्रष्टव्यम् | पृथिवी |

| | | |
|---|---|---|
| **ब्रा.२-४-६-२५** न तान॑शन्ति॒<br>न द॑भाति॒ तस्क॑रः ।<br>२६ न ता अर्वा॑ रे॒णुक॑काटो<br>अश्नुते । | एतच्च मन्त्रद्वयं ब्रह्मण ऋषभमिति<br>विहितस्य पशोरुपहोमार्थे गोसूक्ते<br>अन्तर्भूतम् । अत एव तत्र<br>(ब्रा.२-८-८-(३०-३१) प्रतीकद्वयं<br>आम्नातम् । | गावः |
| २७ रात्री॒ व्य॑ख्यदाय॒ती ।<br>२८ उप॑ ते॒ गा इ॒वाक॑रम् । | एतच्च मन्त्रद्वयं अरिष्ट दर्शनेषु होमेषु<br>विनियोक्तव्यम् । | रात्री |

तथा च वहृवृचा आरण्यकाण्डे संहितोपनिषदि प्रत्यक्षाणि स्वप्नगतानि च अरिष्टानि उपन्यस्य अनन्तरं इमं आमनन्ति ‘स यद्येतेषां किंचित् पश्येत् । उपोष्य पायसं स्थालीपाकं श्रपयित्वा रात्रिसूक्तेन प्रत्यृचं हुत्वा’ इति ।

| | | |
|---|---|---|
| २९ दे॒वीं वाच॑मजनयन्त दे॒वाः ।<br>३० यद्वाग्वद॑न्त्यविचेत॒नानि॑ । | इदं च मन्त्रद्वयं ‘वाचे वेहत’मिति विहिते<br>पशौ विनियोक्तव्यम् । अत एव तदीयस्तोत्रे<br>प्रतीकद्वयम् आम्नातम् ।ब्रा.२-८-८(९-१०) | वाक् |
| ३१ गौरी मि॑माय सलि॒लानि॒ तक्ष॑ती<br>३२ तस्या॑ꣳसमु॒द्रा अधि॒ विक्ष॑रन्ति । | एतच्च मन्त्रद्वयं ‘वाचे वेहतं’ इत्यत्रैव<br>उपहोमार्थं द्रष्टव्यम् । (ब्रा.२-८-८) | वाक् |
| ३३ इन्द्रा॒ सूरा॑ ज॒नय॑न्वि॒श्वक॑र्मा ।<br>३४ इन्द्रः॒ सूरो॑ अतर॒द्रजा॑ꣳसि । | एते ऋचौ स्नुषा श्वशुरीयां इष्टौ<br>याज्यानुवाक्ये । | |
| ३५ अ॒ग्निः क्ष॑त्र॒भृदनि॑भृष्ट॒मोज॑ः । | अयं मन्त्रः आग्नेये कर्मणि द्रष्टव्यः । | अग्निः |

**ब्रा.२-४-७**

| | | |
|---|---|---|
| १ वृषा॑स्य॒ꣳ शु॒र्वृ॑ष॒भाय॑ गृह्यसे । | | |
| २ वि॒षू॒वान् वि॑ष्णो भवतु । | अयं मन्त्रः क्वचित्कर्मणि यजमानाभिमन्त्रणार्थः । | |
| ३ आयु॑ष्मन्त॒ं वर्च॑स्वन्तम् । | अयं मन्त्रः आशीर्वाद रूपे कर्मणि द्रष्टव्यः । | |
| ४ यः सु॒शृंग॑ः सुवृ॒ष॒भः ।<br>५ वृ॒ष॒भेण॒ यज॑मानाः ।<br>६ यस्या॒यमृ॑ष॒भो ह॒विः ।<br>७ नृ॒णामह॑ प्र॒णीरस॑त् । | चत्वारो मन्त्रः ‘ऐन्द्रमृषभमालभेत’<br>(सं.२-१-४-११) इत्येतस्मिन्पशौ<br>उपहोमार्थाः । | इन्द्रः |
| ८ इन्द्र॒ शुष्मं॑ त॒नुवा॒ मेर॑यस्व ।<br>९ प्रेह्य॒भिप्रेहि॒ प्रभ॑रा॒ सह॑स्व । | एतच्चोभयं विजयार्थमैन्द्रे कर्मणि द्रष्टव्यम् । | इन्द्रः |

| | | |
|---|---|---|
| **ब्रा.२-४-७**<br>१० अग्ने॒ जेता॒ त्वं ज॑य ।<br>११ ए॒तं ते॒ स्तोम॑ं तुविजात॒ विप्र॑ः । | एतदुभयं आग्नेये कर्मणि द्रष्टव्यम् । | अग्निः |
| १२ यो घृ॒तेना॒भिमा॑नितः । | | इन्द्रः |
| १३ इन्द्रो॑ जिगाय पृथि॒वीम् ।<br>१४ इन्द्रो॑ जिगाय॒ सह॑सा॒ सहा॒ꣳसि । | इदं मन्त्रद्वयं ऐन्द्रे कर्मणि द्रष्टव्यम् । | इन्द्रः |
| १५ अ॒यं कृ॒त्नुरगृ॑भीतः । | अस्य मन्त्रस्य क्वचिज्जपे विनियोगः | |
| १६ वा॒युर॑ग्रे॒गा य॑ज्ञप्रीः ।<br>१७ वायो॑ शु॒क्रो अ॑यामि ते । | एतदुभयं वायव्ये कर्मणि द्रष्टव्यम् ।<br>प्र उ ग शस्त्रेऽप्यन्तर्भूतः । | वायुः |

१८ इ॒ममि॑न्द्र वर्धय क्ष॒त्रिया॑णाम् । २० अ॒स्मे द्यावा॑पृथिवी॒ भूरि॑ वा॒मम् २२ उत्त॑र॒स्त्वमध॑रे ते स॒पत्ना॑ः ।

१९ इ॒ममाभ॑ज॒ ग्रामे॒ अश्वे॑षु॒ गोषु॑ । २१ यु॒नज्मि॑ त उ॒त्तराव॑न्त॒मिन्द्र॑म् ।

मन्त्र पञ्चकं आशीर्वाद रूपं राजनि पुरोहितेन प्रयोक्तव्यम् ।

| | | |
|---|---|---|
| २३ तुभ्य॑ं भरन्ति क्षि॒तयो॑ यविष्ठ ।<br>२४ यो दे॒ह्यो अन॑मयद्वधस्नैः । | एतच्चोभयं दिवश्येनीष्टिषु 'अग्नये बलिमते चरुं 'इत्यत्र (ब्रा.३-१२-२-८) याज्यानु-वाक्ये । तत्र प्रतीक द्वयं आम्नातम् ।<br>(ब्रा.३-१२-१-१५,१६) | अग्निः बलिमान् |
| २५ प्र स॒द्यो अ॑ग्ने॒ अत्ये॑ष्य॒न्यान् । | अयं मन्त्रः आग्नेये कर्मणि द्रष्टव्यः । | अग्निः |
| २६ ब्रह्म॑ ज्ये॒ष्ठा वी॒र्या॑ संभृ॑तानि ।<br>२७ ब्रह्म॒ स्रुचो॑ घृ॒तव॑तीः । | एतच्चोभयं ब्रह्मण ऋषभमिति विहिते पशौ द्रष्टव्यम् । (ब्रा.२-८-८-२२-२७) | ब्रह्म |
| २८ शृ॒ंगाणी॒वेच्छृं॑गिणा॒ꣳ संद॑दृश्रिरे | सूत्रकार आह यूपं यजमान उपतिष्ठते नमः सखिभ्यः। | थूपाः |
| २९ अ॒भि॒भू र॒ग्निरत॑र॒द्रजा॒ꣳसि ।<br>३० ईशा॑नां त्वा॒ भुव॑नानामभि॒श्रिय॑म् । | एतदुभयं आग्नेये कर्मणि द्रष्टव्यम् । | अग्निः |

**ब्रा.२-४-८** अष्टमे अनुवाके सर्वमपि आग्रयण सूक्तम्। तद्विनियोगं सूत्र आह -

१ स प्र॑त्न॒वन्नवी॑यसा।
२ नवं॒ नु स्तोम॑म॒ग्नये᳚।
३ स्वा॒रु॒हा यस्य॒ श्रियो॑ दृ॒शे।
४ अदा᳚भ्यः पुर ए॒ता।
५ नव॒ꣳ॒ सोमा॑य वा॒जिने᳚।
६ नव॒ꣳ॒ सोम जुषस्व॒नः।

१-२-धाय्ये। ३-६-आज्य भागयोः (अग्निः, सोमः)

| | | |
|---|---|---|
| ७ नव॑स्य सोम ते व॒यम्।<br>८ नव॒ꣳ॒ ह॒विर्जु॑षस्व नः। | सौम्यस्य श्यामाक हविषे याज्यानुवाक्ये। | |
| ९ नव॒ꣳ॒ स्तोमं॒ नव॒ꣳ॒ ह॒विः<br>१० शुचिं॒ नु स्तोमं॒ नव॑जातम॒द्य। | ऐन्द्राग्नस्य द्वादशकपालस्य याज्यानुवाक्ये। | इन्द्राग्नी |
| ११ अ॒ग्निरिन्द्रो॒ नव॑स्य नः।<br>१२ य॒ज्ञं न॒ आ हि गच्छ॑ताम्। | यत्र यद्विकल्पितं हविः ऐन्द्राग्नं द्वादशकपालं आग्नेन्द्रं वेति, तत्रैन्द्राग्नस्य पूर्वे ऋचौ, आग्नेन्द्रस्यत्वेते उभे याज्यानुवाक्ये। | अग्नीन्द्रौ |
| १३ विश्वा᳚न्दे॒वाꣳ॒स्त॑र्पयत<br>१४ एदं ब॒र्हिः सु॒ष्टरी॑मा॒ नवे॑न। | वैश्व देवस्य हविषो याज्यानुवाक्ये । | विश्वेदेवाः |
| १५ इ॒मे नु द्यावा॑पृथि॒वी स॒मीची᳚।<br>१६ इ॒मे धे॒नू अ॒मृतं॒ ये दु॒हाते᳚। | द्यावापृथिव्यमेककपालमित्यस्य याज्यानुवाक्ये। | द्यावापृथिवी |
| १७ यवि॑ष्ठो हव्य॒वाह॑नः।<br>१८ त्वम॑ग्ने दे॒वता᳚भ्यः। | स्विष्टकृतः संयाज्ये। (अग्नेः महित्वनं महिमा, सं.२-६-६-१ अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन्-उदाहृतम्) | अग्निः स्विष्टकृत् |
| १९ अ॒ग्निः प्र॑थ॒मः प्राश्ना॑तु। | श्यामाक हविषः प्राशने विनियुक्तः। | |
| २० भ॒द्रान्नः॒ श्रेयः॒ सम॑नैष्ट देवाः। | व्रीह्याग्रयणस्य शेष भक्षणे विनियोगः। (सं.५-७-२-११) | |
| २१ ए॒तमु॒त्यं मधु॑ना॒ संयु॑तं॒ यव᳚म्। | यवाग्रयणस्य शेष भक्षणे विनियोगः। | |

॥ इति चतुर्थः प्रश्नः समाप्तः ॥

| मन्त्रभागः | ब्राह्मण भागः/सूत्रम् | देवता |
|---|---|---|
| **ब्रा.२-५-१** | | |
| १ प्रा॒णो र॑क्षति॒ विश्व॒मेज॑त् ।<br>२ यो दे॒वो दे॒वेषु॑ वि॒भूर॒न्तः । | एतन्मन्त्रद्वयं प्राणदेवता विषयं द्रष्टव्यम् । | |
| ३ मन॑स॒श्चित्ते॒दम् ।<br>४ आ न॑ एतु पुरश्च॒रम् । | एतन्मन्त्रद्वयं मनोदेवता विषयं द्रष्टव्यम् । | |
| ५ जु॒षतां॑ मे॒ वागि॒द२॑ ह॒विः ।<br>६ यया॑ रू॒पाणि॑ बहु॒धा वद॑न्ति । | एतन्मन्त्रद्वयं वाग्देवता विषयं द्रष्टव्यम् । | |
| ७ चक्षु॑र्दे॒वानां॑ ज्योति॑र॒मृते॒ न्य॑क्तम्।<br>८ आयु॒रिन्न॒ः प्रती॑र्यताम् । | एतन्मन्त्रद्वयं चक्षुर्देवता विषयं द्रष्टव्यम् । | |
| ९ श्रोत्रे॑ण भ॒द्रमु॒त शृ॑ण्वन्ति स॒त्यम् ।<br>१० येन॒ प्राच्या॑ उ॒त द॑क्षि॒णा । | एतन्मन्त्रद्वयं श्रोत्र विषयं द्रष्टव्यम् । | |

(ऐतरेय ब्राह्मणे, ‘चक्षुः श्रोत्रं मनो वाक् प्राणस्ता एताः पञ्च देवता इमं विश्लिष्टाः पुरुषम्’ इति) एतेषां दशानां मन्त्राणां जातकर्मणि विनियोगमाह बौधायनः -‘अथैनं दधिमधुघृतमिति समुदाहृत्य हिरण्येन प्राशयति प्राणो रक्षति विश्वमेजत् इत्यनुवाकेन प्रत्यृचम्’ ॥ उदक शान्ति जपे विनियुज्यते ॥

**ब्रा.२-५-२**

१ उ॒देहि॑ वाजि॒न्यो अ॑स्य॒प्स्व॑न्तः ।
२ रोह॒२॑ रोह॒२॒ रोहि॑त॒ आरु॑रोह ।
३ आहा॑र्षीद्॒ रा॒ष्ट्रमि॒ह रोहि॑तः ।
४ विम॑मर्श॒ रोहि॑तो वि॒श्वरू॑पः ।
५ यास्ते॒ वि॒शस्तप॑सा संबभू॒वुः ।
६ यू॒यमु॑ग्रा मरुतः पृश्निमातरः ।
७ रोहि॑तो॒ द्यावा॑पृथि॒वी ज॑जान ।
८ रोहि॑तो॒ द्यावा॑पृथि॒वी अ॑द२॑हत् ।

एतैरष्टभिर्मंत्रैः अश्वमेध गतस्य अश्वस्य जलमध्यात् उद्गमनं कुर्यात् ॥

---

| | | |
|---|---|---|
| ९ सु॒शेवं॑ त्वा भा॒नवो॑ दीदि॒वा२॑सम्<br>१० अग्ने॒ शर्ध॑ मह॒ते सौभ॑गाय । | इदं मन्त्रद्वयं आग्नेये कर्मणि द्रष्टव्यम् । | |

तत्रोत्तरस्य विवाह कर्मण्यपि विनियोगं बौधायन आह - ‘अथ तथोपविश्य अन्वारब्धायां उपयमनीर्जुहोति अग्ने शर्ध महते सौभगाय’ इति ।

**ब्रा.२-५-३**

| | | |
|---|---|---|
| १ पुनर्न इन्द्रो मघवा ददातु ।<br>२ यानि नो जिनन्धनानि । | एतदुभयं नष्ट धनस्य पुनः प्राप्त्यर्थे कस्मिंश्चि-दैन्द्रे कर्मणि द्रष्टव्यम् । | इन्द्रः |
| ३ इन्द्र आशाभ्यः परि । | अयं मन्त्रः पूर्वत्रैव उपहोमार्थः । | इन्द्रः |
| ४ आकूत्यै त्वा कामाय त्वा<br>५ आकूतिमस्यावसे ।<br>६ आकूतिं देवीं मनसः पुरो दधे । | अस्य मन्त्र त्रयस्य कर्मणामादौ संकल्पे विनियोगं बौधायन आह । 'आकूत्यावेदनं करोति'. | |
| ७ सेदग्निरग्नी॑ऽ रत्यैत्यन्यान् । | अयं मन्त्रः प्रायणीयेष्टौ स्विष्टकृतः पुरोनुवाक्या । | अग्निः स्विष्टकृत् |

८ आशानां त्वाऽऽशापालेभ्यः ।  ९ विश्वा आशा मधुना सꣳसृजामि ।

इदं मन्त्रद्वयं पशौ संज्ञप्यमाने यजमानेन जप्यम् । तथा दिवः श्येनी संज्ञिकास्विष्टिषु 'आशायै चरुम्' (ब्रा.३-१२-२-२) इत्यस्य याज्यानुवाक्ये । तथा तयोः प्रतीकद्वयं आम्नातं 'आशानां त्वा, विश्वा आशाः' (ब्रा.३-१२-१) इति । आशा देवता ।

| | | |
|---|---|---|
| १० अग्निः सोमो वरुणो मित्र इन्द्रः ।<br>११ त्वष्टा रूपाणि दधती सरस्वती । | एतच्च मन्त्रद्वयं मित्र विन्दायामिष्टौ याज्यानुवाक्ये । तथा च आश्वलायनः 'मित्रविन्दा महावैराजी' इत्यादिनोदाजहार । | आशा |

**ब्रा.२-५-४**

| | | |
|---|---|---|
| १ आनो भर भगमिन्द्र द्युमन्तम् ।<br>२ इमं कामं मन्दया गोभिरश्वैः । | एतच्चोभयं ऐन्द्रे कर्मणि द्रष्टव्यम् । | इन्द्रः |

३ इन्द्रस्य नु वीर्याणि प्रवोचम्  ४ अहन्नहिं पर्वते शिश्रियाणाम्।  ५ वृषायमाणोऽवृणीत सोमम् ॥

६ यदिन्द्राहन् प्रथमजामहीनाम् ।  ७ अहन्वृत्रं वृत्रतुरं व्यंꣳसम् ।  ८ अयोध्येव दुर्मद आहि जुह्वे ।

षण्मंत्राः निष्कैवल्ये शस्त्रे अन्तर्भावनीयाः

| | | |
|---|---|---|
| ९ विश्वो विहाया अरतिः।<br>१० उदुज्जिहानो अभिकाममीरयन् ।<br>११ जुषाणो हव्यममृतेषु दूढ्यः | मन्त्रत्रयं आग्नेये कर्मणि द्रष्टव्यम् ।<br>९ - अत्यष्टिः छन्दः ॥ | अग्निः |

| | | |
|---|---|---|
| **ब्रा.२-५-४**<br>१२ अश्वि॑ना य॒ज्ञमाग॑तम् ।<br>१३ इ॒मं य॒ज्ञम॒श्विना॑ व॒र्धय॑न्ता । | एतच्चोभयं 'अश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति' (सं.१-८-१९-३) इत्यस्य याज्यानुवाक्ये । | अश्विनौ |
| १४ प्रते॑ म॒हे सर॑स्वति ।<br>१५ इ॒दं ते॑ ह॒व्यं घृ॒तव॑त्सरस्वति । | एते ऋचौ 'सरस्वते सत्य वाचे चरुं' (सं.१-८-१९-३) इत्यस्य याज्यानुवाक्ये । | सरस्वती |
| **ब्रा.२-५-५**<br>१ य॒ज्ञो रा॒यो य॒ज्ञ ई॑शे॒ वसू॑नाम् ।<br>२ अ॒यं य॒ज्ञो व॑र्धतां॒ गोभि॒रश्वैः॑ । | एते ऋचौ दिवः श्येनी नामिकास्विष्टिषु 'यज्ञाय चरुं'(ब्रा.३-१२-२-) इत्यस्य याज्यानुवाक्ये । (ब्रा.३-१२-१- प्रतीके) | यज्ञः । |
| ३ भग॑ ए॒व भग॑वाँ॒ अस्तु देवाः ।<br>४ भग॒ प्रणे॑त॒र्भग॒ सत्य॑ राधः । | एतद् द्वयं 'भगाय चरुं वावातायै गृहे' (ब्रा.१-७-३-) इति अस्मिन् कर्मणि द्रष्टव्यम् । | भगः |
| ५ शश्व॑ती॒ः समा॒ उप॑यन्ति लो॒काः । | अस्यामृचि देवताभिव्यक्त्यभावात् | |
| 'अनिरुक्तः प्रजापतिः' (ब्रा.१-८-५-२०) इत्यनुसारेण प्राजापत्ये कर्मणि द्रष्टव्या । | | |
| ६ इ॒यमे॒व सा या प्र॑थ॒मा व्यौच्छ॑त्<br>७ द्वे स्वसा॑रौ वयत॒स्तन्त्र॑मे॒तत् । | एतच्च मन्त्रद्वयं क्रमाद् उषो देवताके अहोरात्र देवताके च द्रष्टव्यम् । | उषाः,<br>अहोरात्रे |
| ८ आ वो॑ यन्तूदवा॒हासो॑ अ॒द्य ।<br>९ धा॒रा॒व॒रा म॒रुतो॑ धृ॒ष्णुवो॑जसः । | एतच्चोभयं मारुते कर्मणि द्रष्टव्यम् । | मरुतः |
| १० विच॑क्रमे॒ ★११ त्रिर्दे॒वः ★ | एतच्चोभयं वैष्णवे कर्मणि द्रष्टव्यम् । | विष्णुः |
| १२ आ वे॒धस॒ं नील॑पृष्ठं बृहन्त॑म् ।<br>१३ स हि शुचि॑ः श॒तप॑त्र॒ः स शु॒न्ध्यूः । | एतच्च मन्त्रद्वयं 'श्वे॒तां बा॑र्हस्पत्यां' (सं.२-१-२-७) इत्यस्य पशोः सूक्ते द्रष्टव्यम् । (प्रतीके ब्रा.२-८-२-१९,२०) | ब्रह्मणस्पतिः |
| १४ पूष॒ँ स्तव॑ व्र॒ते व॒यम् ।<br>१५ यास्ते॑ पूषन्नावो॑ अ॒न्तः स॑मु॒द्रे । | एतदुभयं पौष्णे कर्मणि द्रष्टव्यम् । सूक्तेऽपि एकस्य प्रतीकमाम्नातम् 'यास्ते पूषन्नावो अन्तः' इति (ब्रा.२-८-५-१३) | पूषा |
| १६ अर॑ण्यान्यर॑ण्यान्यसौ ।<br>१९ गाम॒ङ्गैष॒ आह्व॑यति । | १७ वृ॒षा॒रवा॑य॒ वद॑ते ।<br>२० न वा अ॑रण्या॒निर्ह॑न्ति । | १८ उ॒त गाव॑ इवादन् ।<br>२१ आञ्ज॑नगन्धीँ॒ सु॒र॒भीम् । |
| मन्त्र षट्कं आरण्य वासिभिः तपस्विभिः स्वरक्षार्थं देवतां प्रार्थयितुं जपितव्यम् । | | |

| | | |
|---|---|---|
| **ब्रा.२-५-६**<br>१ वार्त्रहत्याय शवसे ।<br>२ सुब्रह्माणं वीरवन्तं बृहन्तम् । | एतच्चोभयं ऐन्द्रे कर्मणि द्रष्टव्यम् । | इन्द्रः |
| ३ क्षेत्रियै त्वा निर्ऋत्यै त्वा ।<br>४ शं ते अग्निः सहाद्भिरस्तु ।<br>५ या दैवीश्चतस्रः प्रदिशः ।<br>६ अमोचि यक्ष्माद् दुरितादवर्त्यै ।<br>७ सूर्यमृतं तमसो ग्राह्या यत् । | एतेषां मन्त्राणां जातकर्मणि विनियोगमाह बौधायनः 'अथैनं स्नापयति क्षेत्रियैत्वा निर्ऋत्यै त्वा' । (कुमारः अत्र संबोध्यते) (मन्त्र. प्र.२-१२ अपि पश्यत ।) | |
| ८ बृहस्पते युवमिन्द्रश्च वस्वः । | एतस्य मन्त्रस्य बृहस्पति यागे यजमानाभि-षेके विनियोगं आपस्तम्ब आह । | इन्द्रा बृहस्पती |
| ९ देवायुधमिन्द्रमाजोहुवानाः । | अयं मन्त्रः ऐन्द्रे कर्मणि द्रष्टव्यः । | इन्द्रः |
| १० यत्ते सुजाते हिमवत्सु भेषजम् ।<br>११ अदो गिरिभ्यो अधि यत्प्रधावसि । | एते उभे ऋचौ एतदोषधि देवताके शाखान्तरगते कर्मणि याज्यानुवाक्ये । | |
| १२ पूर्वं देवा अपरेणानुपश्यन् जन्मभिः ।<br>१३ प्राणापानौ चक्षुः श्रोत्रम् । | एते ऋचौ दिवः श्येनीष्विष्टिषु 'अनुवित्यै चरुं' (ब्रा.३-१२-२-९) इत्यत्र याज्यानु-वाक्ये । प्रतीक द्वयं आम्नातं (ब्रा.३-१२-१७,१८) ॥ | अनुवित्तिः |
| १४ इमा एव ता उषसो याः प्रथमा व्यौच्छन् । | अयं मन्त्रः उषादेवताके कर्मणि द्रष्टव्यः । | उषाः |
| **ब्रा.२-५-७**<br>१ वसूनां त्वाधीतेन । | अस्य मन्त्रस्य सावित्र चयने विनियोगं आपस्तम्ब आह । | |
| २ अभिभूतिरहमागमम् । | अयं मन्त्रः कस्मिंश्चिदाग्रयणे कर्मण्युपहोमार्थः । | |
| ३ इदं वर्चो अग्निना दत्तमागात् । | अस्य मन्त्रस्य हारियोजनादूर्ध्व भाविनि यज्ञपुच्छे विनियोगः । | |
| ४ आयुरसि विश्वायुरसि । | अस्य मन्त्रस्य आयुष्कामेष्टौ कर्णाभरण धारणे विनियोगं आपस्तम्ब आह । | |

**ब्रा.२-५-७**

५ भूर्भुव॒ः सुव॑ः   ६ अ॒ग्निर्धर्मै॑णान्ना॒दः   ७ प्र॒जाप॑तिः प्रणे॒ता ।

मन्त्र त्रयस्य विनियोगः सूत्रान्तरेषु मृग्यम् ।

---

८ अ॒ग्निर॑न्ना॒दोऽन्न॑पतिः

९ सोमो॒ राजा॒ राज॑पतिः

१० वरु॑णः स॒म्राट् स॒म्राट्प॑तिः

११ मि॒त्रः क्ष॒त्रं क्ष॒त्रप॑तिः

१२ इन्द्रो॒ बलं॒ बल॑पतिः

१३ बृह॒स्पति॒र्ब्रह्म॒ ब्रह्म॑पतिः

१४ स॒वि॒ता रा॒ष्ट्रꣳ रा॒ष्ट्रप॑तिः ।

१५ पू॒षा वि॒शां विट्प॑तिः

१६ सर॑स्वती॒ पुष्टि॒ः पुष्टिं पत्नी

१७ त्वष्टा॑ पशू॒नां मि॑थु॒नानाꣳ रू॒पकृ॒द्रू॒पप॑तिः

दश मन्त्राः मित्रविन्दाख्यायां इष्टावुपहोमार्थाः ।

---

| | | |
|---|---|---|
| **ब्रा.२-५-८**<br>१ स ई᳚ं पाहि॒ य ऋ॑जी॒षी तरु॑त्रः । | अयं मन्त्रः माध्यंदिन सवने प्रस्थित याज्यास्वन्तर्भावनीयः । | इन्द्रः |
| २ आ ते॒ शुष्मो॑ वृष॒भ ए॑तु प॒श्चात् ।<br>३ प्रोष्व॑स्मै पुरो र॒थम् । | एतच्चोभयं कस्मिंश्चिदैन्द्रे कर्मणि विनियोज्यम् । | इन्द्रः |
| ४ इन्द्रं॑ व॒यꣳ शु॑ना॒सीर॑᳚म् ।<br>५ इन्द्रा॑य॒ शुना॒सीरा॑य ।<br>६ प्रह॒व्यानि॑ घृ॒तव॑न्त्यस्मै । | अत्र आपस्तम्बः "इन्द्राय शुनासीराय पुरोडाशो द्वादशकपालः" (सं.१-८-७-१) इत्यस्मिन्कर्मणि मन्त्र द्वयं  विनियुक्तम् । इन्द्रं॑ व॒यं' इति मन्त्रः पुरोनुवाक्यया विकल्प्यते । | इन्द्रः शुनासीरः |
| ७ वय॑ः सुप॒र्णा उप॑सेदु॒रिन्द्र॑᳚म् । | अस्य मन्त्रस्य सोमक्रयादूर्ध्वं अंसाच्छादक वस्त्राप नयने विनियोगं आपस्तम्ब आह । | इन्द्रः |
| ८ बृ॒हदिन्द्रा॑य गायत । | अस्य च मन्त्रस्य क्वचित्सोम विकृतौ विनियोगो द्रष्टव्यः । | इन्द्रः |
| ९ का मि॒हैका॒ः क इ॒मे पत॑ङ्गाः । | अयं मन्त्रः नेत्र रोग परिहाराय प्रयोक्तव्यः । | देवाः |
| १० ए॒वा व॑न्दस्व॒ वरु॑णं बृ॒हन्त॑᳚म् । | अस्य मन्त्रस्य ब्रह्मण उत्संगे सोमासादने विनियोगमापस्तम्ब आह । | |
| ११ नाके॑ सुप॒र्णमु॑प॒ यत्पत॑न्तम् । | अयं मन्त्रः प्रवर्ग्यस्याभिषवे अन्तर्भावनीयः | |

**ब्रा.२-५-८**

| | | |
|---|---|---|
| १२ शं नो॑ दे॒वीर॒भिष्ट॑ये ।<br>१३ ईशा॑ना॒ वार्या॑णाम् ।<br>१४ अ॒प्सु मे॒ सोमो॑ अब्रवीत् । | एतन्मन्त्रत्रयं अब्देवताके कर्मणि द्रष्टव्यम् ।<br>१४-अस्य अवभृथेष्टौ द्वितीय आज्य<br>भागेऽपि विनियोगं आपस्तम्ब आह । | आपः |
| १५ यद॒प्सु ते॑ सरस्वति ।<br>१६ या सर॑स्वती वैशंभ॒ल्या । | एतस्य मन्त्रद्वयस्य दार्शिके यजमाने<br>विनियोगमापस्तम्ब आह । | सरस्वती |
| १७ अ॒हं त्वद॑स्मि॒ मद॑सि॒ त्वमे॒तत् । | एतस्य मन्त्रस्य फलचमसे विनियोगं<br>आपस्तम्ब आह । | |
| १८ इ॒हैव सन्तत्र॒ सन्तं॑ त्वाग्ने । | अयं मन्त्रः क्वचिदग्न्युपस्थाने विनियोक्तव्यः । | अग्निः |
| १९ अ॒यं ते॒ योनि॑र् ऋ॒त्विय॑ः । | एतस्य मन्त्रस्य विनियोगो ब्राह्मणेनाम्नातः | अग्निः |

‘अयं ते योनिर् ऋत्विय इत्यरण्योः समारोहयति’ इति (सं.३-४-१०-८) ॥

| | | |
|---|---|---|
| २० या ते॑ अग्ने य॒ज्ञिया॑ त॒नूस्तयेहिं | एतस्यापि मन्त्रस्य विनियोगो ब्राह्मणे दर्शितः | अग्निः |

‘या ते अग्ने यज्ञिया तनूस्तयेह्यारोहेत्त्यात्मन् समारोहयते’ इति (सं.३-४-१०-९)

| | | |
|---|---|---|
| २१ उ॒पाव॑रोह जातवेद॒ः पुन॒स्त्वम् । | एतस्य विनियोगमापस्तम्ब आह-उपावरोह जातवेद इति<br>निवर्तमानमभि मन्त्रयते । | जातवेदाः<br>(अग्निः) |

| | | |
|---|---|---|
| २२ तमिन्द्रं॑ जोहवीमि | २४ वि॒द॒द्यती॑ स॒रमा॑ रु॒ग्णमद्रेः॑ । | २६ त्वं नृभि॑र्नृपते दे॒वहू॑तौ । |
| २३ त्रिक॑द्रुकेषु महि॒षो यवा॑शिरं | २५ वि॒दद् गव्य॑ स॒रमा॑ | २७ ए॒वा पा॑हि प्र॒त्नथा॒ मन्द॑तु त्वा । |

मन्त्र षट्कं ऐन्द्रे कर्मणि द्रष्टव्यम् । इन्द्रः देवता ।

| | | |
|---|---|---|
| २८ अग्ने॒ बाध॑स्व वि मृधो॑ नुदस्व ।<br>२९ यज्ञ॒ प्रति॑ तिष्ठ सुम॒तौ सु॒शेवा॒ | एतयोः मन्त्रयोः उत्तर वेद्यां अग्नि<br>प्रतिष्ठापने विनियोगं आपस्तम्ब आह । | अग्निः |
| ३० इन्द्र॑ः शुनाव॒द्वित॑नोति॒ सीर॑म् ।<br>३१ इन्द्र॑स्य॒ राध॒ः प्रय॑तं पु॒रुत्मना॑ ।<br>३२ अ॒श्वायन्तो॑ ग॒व्यन्तो॑ वा॒जय॑न्तः | एतन्मन्त्रत्रयं शुनासीर गुणक इन्द्र<br>देवताके कर्मणि द्रष्टव्यम् । | शुनासीरः<br>इन्द्रः |

**ब्रा.२-६-९**

| | | |
|---|---|---|
| (१,२) आर्च॑र्षणि॒ प्रा ★, वि॒वेष॒ यन्मा॑ ★ | सौत्रामण्यां ऐन्द्रे पशौ, वपायाः पुरोनुवाक्या, याज्या। | इन्द्रः |
| (३-४) तꣳस॒ध्रीची॑ः ★ स॒त्यमित्तन्न त्वावा॑ꣳ अ॒न्यो अस्ति॑ | पुरोडाशस्य पुरोनुवाक्या, याज्या | इन्द्रः |
| (५-६) प्रस॑साहिषे पुरुहूत॒ शत्रू॑न्। स शेवृ॑ध॒मधि॑धा द्यु॒म्नम॒स्मे। | हविषः पुरोनुवाक्या, याज्या | इन्द्रः |

**ब्रा.२-६-१३**

| | | |
|---|---|---|
| १ अ॒श्विना॑ ह॒विरि॑न्द्रि॒यम्॒। | ४ य इन्द्र॑ इन्द्रि॒यं द॒धुः। | ७ अ॒श्वि॑ना॒ गोभि॑रिन्द्रि॒यम्॒। |
| २ यम॒श्विना॒ सर॑स्वती। | ५ स॒वि॒ता वरु॑णो॒ दध॑त्॒। | ८ ता नास॑त्या सु॒पेश॑सा। |
| ३ तमिन्द्र॑ प॒शव॒ः सचा॑। | ६ वरु॑णः क्ष॒त्रमि॑न्द्रि॒यम्॒। | ९ ता भि॒षजा॑ सु॒कर्म॑णा। |

त्रिपशुके वपा पुरोडाश हविर्यागानां पुरोनुवाक्याः ता एव याज्याः। तत्र तिसृणां वपानां तिस्र ऋचः, तासां च एकैका, कस्यांचिद् वपायां पुरोनुवाक्या, कस्यांचिद् याज्या इत्येवं द्विरूपा।
१ - प्रथमायां पुरोनुवाक्या, तृतीयायां याज्या। २ - प्रथमायां याज्या, द्वितीयस्यां पुरोनुवाक्या।
३ - द्वितीयस्यां याज्या, तृतीयस्यां पुरोनुवाक्या। त्रिषु पुरोडाशेषु, पूर्ववत् - ४,५,६।
हविषः तिस्रः पूर्ववत् - ७,८,९।

**ब्रा.२-६-१६** पितृयज्ञ याज्यानु वाक्याः - सं. १-६-१२ पश्यत॥

**ब्रा.२-६-१९**

| | |
|---|---|
| १ व॒स॒न्तेन॒र्तुना॑ दे॒वाः। २ ग्री॒ष्मेण॑ दे॒वा ऋ॒तुना॑। | ऐन्द्रे पशौ - वपायाः पुरोनुवाक्या, याज्या |
| ३ व॒र्षाभि॑र् ऋ॒तुना॑ऽऽदि॒त्याः। ४ शा॒र॒देन॒र्तुना॑ दे॒वाः। | पुरोडाशस्य पुरोनुवाक्या, याज्या |
| ५ हे॒म॒न्तेन॒र्तुना॑ दे॒वाः। ६ शै॒शि॒रेण॒र्तुना॑ दे॒वाः। | हविषः पुरोनुवाक्या, याज्या |

## ब्रा. २-८

**याज्यानुवाक्याः काम्यानां पशूनां अष्टमे श्रुताः । वायव्यः श्वेत आलभ्य इति वाक्या उदीरिताः । एकैकस्मिन् पशौ सूक्तं एकैकं भवति क्रमात् ॥ ऋचः षट् सूक्त एकस्मिन् तत्र द्वेद्वे क्रमाच्छ्रुते । वपायां च पुरोडाशे हविषीति क्रमो भवेत् ॥**

| मन्त्रभागः | ब्राह्मण भागः/सूत्रम्/भाष्यम् | देवता |
|---|---|---|

ब्रा.२-८-१-

१ पीवो॑न्ना᳚ऽ र॒यि॒वृधः॑ सु॒मे॒धाः । ३ आ वायो॒ ★ ५ प्र वा॒युमच्छा॑ बृ॒ह॒ती म॑नी॒षा ।

२ रा॒ये न यं ज॒ज्ञतू॒ रोद॑सी उ॒भे । ४ प्रयाभिः॑ ★ ६ आ नो॑ नि॒युद्भिः॑

वा॒य॒व्यू॒m॑ श्वे॒तमाल॑भेत॒ भूति॑कामः (सं.२-१-१-१) अत्र पशोः सूक्ते क्रमेण वपायाः पुरोनुवाक्या-याज्या, पुरोडाशस्य पुरोनुवाक्या-याज्या, हविषः पुरोनुवाक्या-याज्या ॥ वायुः देवता ॥
सं.५-५-१-४ पश्यत, वा॒यु॒मती᳚ श्वे॒तव॑ती याज्यानुवा॒क्ये॑ भवतः

**यदेतत् षडृचं सूक्तं वायव्य पशौ प्रवृत्तं, तदेतत् सूत्रकारः स्पष्टीचकार – 'काम्यैः पशुभिः अमावास्यायां पौर्णमास्यां वा यजेत् । तेषां निरूढ पशु बन्धवत् कल्पः वायव्यꣳश्वेतमिति । ये ब्राह्मणे न व्याख्याताः तेषां आवापिकेषु स्थानेषु यथादेवतं षडृचो निदधाति । वपायाः, पुरोडाशस्य, हविषः इति द्वेद्वे । पीवोन्नाꣳ रयिवृधः सुमेधा इत्येतानि यथापूर्वं यथा लिङ्गं आम्नातानि भवन्ति' इति ।**

---

७ प्रजा॑पते॒ न त्वदे॒ता॒न्य॒न्यः ९ प्रजा॑पते॒ त्वं निं॑धि॒पाः पु॑रा॒णः ११ प्र॒जाप॑तिं प्रथ॒मं य॒ज्ञियाना॑म्

८ र॒यी॒णां पतिं॑ यज॒तं बृ॒हन्त᳚म् १० तवे॒मे लो॒काः प्र॒दिशो॒ दिश॑श्च १२ यो रा॒य ईशे॑ शतदा॒य उ॒क्थ्य॑ः

यः प्र॒जाका॑मः प॒शुका॑म॒ः स्यात् (सं.२-१-१-७) (आपस्तम्बिनां प्राजापत्यकाण्ड व्रत उपक्रमे उत्सर्जने च विनियुज्यते)॥ प्रजापतिः देवता ॥

---

१३, १४ सोमा॑पूषणे॒मौ दे॒वौ ★[1] १६ दि॒व्य॑न्यः सद॑नं च॒क्र उ॒च्चा । १८ विश्वा᳚न्य॒न्यो भुव॑ना ज॒जान॑ ।

१५ सोमा॑पूषणा॒ रज॑सो वि॒माना᳚म् । १७ धियं॑ पू॒षा जिं॑न्वतु विश्वमि॒न्वः ।

सो॒मा॒पौ॒ष्णं त्रै॒तमाल॑भेत (सं.२-१-१-१०) सोमापूषणौ देवते ॥

---

[1] ★ प्रतीकम्

**ब्रा.२-८-१**

१९ उदु॑त्तमं वरु॑ण★ २१ यत्किञ्चे॒दं★ २३ अव॑ ते॒ हेड॑ः★

२० अस्त॑भ्नाद् द्याम्★ २२ कि॒त॒वास॑ः★ २४ तत्वा॑याम्★

यो वरु॑णगृहीत॒ः स्यात् (सं. २-१-२-२) (प्रतिसर जपे विनियुज्यते) वरुणः देवता ॥

---

२५ आ॒दि॒त्याना॒मव॑सा ★ २७ धा॒रय॑न्त आदि॒त्यास॑ः ★ २९ य॒ज्ञो दे॒वाना॑ँ★

२६ न द॑क्षि॒णा ★ २८ ति॒स्रो भूमी॑र्धारयन् ★ ३० शुचि॑रि॒पः★

यो ब्र॑ह्मवर्च॒स का॑म॒ः स्यात् तस्मा॑ ए॒तां दशा॑र्ष॒भा॒मालभे॑त (सं.२-१-४-२) आदित्याः देवताः ॥

---

**ब्रा.२-८-२**

१ ते शु॒क्रास॒ः शुच॑यो र॒श्मिव॑न्त॒ः । ३ आ न॑ः पु॒त्रा अदि॑ते॒र्या॑न्तु य॒ज्ञम् । ५ आ॒दि॒त्यान्का॒म॒मव॑से हुवेम ।

२ ते सू॒नवो॒ अदि॑तेः पीव॒सामिष॑ँम्। ४ स्क॒भा॒य॒त निर्ऋ॑तिँ॒ सेध॒ताम॑तिम् ६ स्ती॒र्णं ब॒र्हिःसी॑दता य॒ज्ञे

यः का॒मये॑त॒ प्रथे॑य प॒शुभि॑ः प्र प्र॒जया॑ जाये॒येति॒ स ए॒तामवि॑ व॒शामा॑दि॒त्येभ्य॒ः कामा॒याल॑भेत (२-१-२-५) आदित्याः देवताः ॥

---

७ अग्ने॒ नय॑ सु॒पथा॑ रा॒ये अ॒स्मान् । ९ अच्छा॒ गिरो॑ म॒तयो॑ देव॒यन्ती॑ः । ११ अग्ने॒ त्वं पा॑रया॒ नव्यो॑

८ प्रव॑ः शु॒क्राय॑ भा॒नवे॑ भरध्वम् । १० अग्ने॒ त्वम॒स्मद् यु॑यो॒ध्यमी॑वाः । १२ प्रका॑रवो मन॒ना व॒च्यमा॑नाः।

यो ब्र॑ह्मवर्च॒स का॑म॒ः स्यात् तस्मा॑ ए॒ता म॒लू॒हा आल॑भेताग्ने॒यीं कृ॑ष्ण ग्री॒वीं (सं.२-१-२-७)
(आग्नेयं सूक्तम्) आपस्तम्बिनां आग्नेय काण्ड व्रत उपक्रमे उत्सर्जने च विनियुज्यते) अग्निः देवता ॥

---

१३ इन्द्रं॒ नरो॑ ★ १५ जगृ॒भ्णा ते॒ दक्षि॑णमिन्द्र॒ हस्त॑ँम् १७ समि॑न्द्र णो॒ मन॑सा नेषि

१४ यु॒जे रथ॑ँम् । ★ १६ तवे॒दं विश्व॑म॒भित॑ः पश॒व्य॑म् । १८ आ॒राच्छत्रु॒मप॑ बाधस्व

स॒ँ॒हि॒तामै॒न्द्रीम् (सं.२-१-२-७) (इन्द्र सूक्तम्) इन्द्रः देवता ॥

---

१९ आ वे॒धस॒ँ ★ २१ बृ॒ह॒स्पति॑ः प्र॒थ॒मं जाय॑मानः । २३ बृह॑स्पते॒ परि॑ ★

२० स हि शुचि॑ः ★ २२ बृ॒ह॒स्पति॑ः सम॑जयद्वसू॑नि । २४ ए॒वा पि॒त्रे ।★

श्वे॒तां बा॑र्ह॒स्प॒त्याम् (सं.२-१-२-७)(बृहस्पति सूक्तम्) बृहस्पतिः देवता ॥

---

२५ आनो॑ दि॒वः ★ २७ इ॒मा जु॒ह्वा॑ना॒ ★ २९ सर॑स्वत्य॒भि नो॑ नेषि ।★

२६ पावी॑रवी★ २८ यस्ते॒ स्तन॑ः ★ ३० इ॒यँ॒शुष्मे॑भिर्बिस॒खा

सा॒र॒स्व॒तीं मे॒षीं सं.२-१-२-११ (सरस्वती सूक्तम्) सरस्वती देवता ॥

---

**ब्रा.२-८-३**

| | | |
|---|---|---|
| १ सोमो धेनु९सोमो अर्व न्तमाशुम् | ३ त्व९ सोम क्रतुभिः। ★ | ५ त्वमिमा ओषधीः सोम |
| २ अषाढं युत्सु ★ | ४ या ते धामानि हविषा यजन्ति।★ | ६ या ते धामानि दिवि या |

आग्नेयं कृष्ण ग्रीवमालभेत सौम्यं बभ्रुम् - सं २-१-२-१५ (सोम सूक्तं) सोमः देवता ॥
(आपस्तम्बिनां सौम्य काण्ड व्रत उपक्रमे उत्सर्जने च विनियुज्यते)

---

| | | |
|---|---|---|
| ७ विष्णोर्नुकं ★ | ९ प्र तद्विष्णुः। ★ | ११ विचक्रमे ★ |
| ८ तदस्य प्रियम्।★ | १० परो मात्रया तनुवा वृधान। | १२ त्रिर्देवः। ★ |

वैष्णवं वामनमालभेत स्पर्धमानः (सं.२-१-३-२) (विष्णु सूक्तं) विष्णुः देवता ॥:
(आपस्तम्बिनां प्रतिसर जपे विनियुज्यते)

---

| | | |
|---|---|---|
| १३ आ ते महो ★ | १५ अभि गोत्राणि।★ | १७ अय९शृण्वे अध जयन्नुतघ्नन् |
| १४ यो जात एव।★ | १६ आभिः स्पृधो मिथतीररिषण्यन्। | १८ अनु स्वधामक्षरन्नापो अस्य। |

इन्द्राय मन्युमते मनस्वते (सं.२-१-३-३) इन्द्रः देवता ॥

---

| | | |
|---|---|---|
| १९ मरुत्वन्तं वृषभं वावृधानम्। | २१ क्व स्या वो मरुतः स्वधासीत्। | २३ वधीं वृत्रं मरुत इन्द्रियेण। |
| २० जनिष्ठा उग्रः सहसे तुराय। | २२ वृत्रस्य त्वा श्वसथादीषमाणाः। | २४ स यो वृषा वृष्णियेभिः |

इन्द्राय मरुत्वते पृश्निसक्थमालभेत (सं.२-१-३-५) इन्द्रः देवता ॥

---

| | | |
|---|---|---|
| २५ इन्द्रो वृत्रमतरद्वृत्र तूर्ये। | २७ इन्द्रो यज्ञं वर्धयन्विश्ववेदाः। | २९ इन्द्रो देवाञ्छम्बर हत्य आवत् |
| २६ स एव वीरः स उ वीर्यावान्। | २८ इमं यज्ञं वर्धयन्विश्ववेदाः। | ३० यः सप्त सिन्धू९ रदधात् |

इन्द्राय वृत्रतुरे ललामं प्राशृंगमालभेत (सं.२-१-३-११)इन्द्रः देवता ॥

---

**ब्रा.२-८-४**

| | | |
|---|---|---|
| १ इन्द्रस्तरस्वानभिमातिहोग्रः। | ३ इन्द्र९ स्तुहि वज्रिण९ स्तोम - | ५ इन्द्रो देवानामधिपाः पुरोहितः |
| २ हिरण्य वर्णो अभयं कृणोतु। | ४ स्तुहि शूरं वज्रिणमप्रतीत्तम्। | ६ य इमे द्यावापृथिवी महित्वा। |

इन्द्रायाभिमातिघ्ने ललामं प्राशृंगमालभेत (सं.२-१-३-१२) इन्द्रः देवता ॥

---

**ब्रा.२-८-४**

७ अनवस्ते रथं ★ ८ वृष्णे यत्ते ।★ ९ इन्द्रस्य नु वीर्याणि ★ १० अहन्नहिम् ★ ११ इन्द्रो यातोऽवसितस्य राजा । १२ अभि सिध्मो अजिगादस्य

इन्द्राय वज्रिणे ललामं प्राशृंगमालभेत (सं.२-१-३-१३) इन्द्रः देवता ॥

---

१३ विष्णुं देवं वरुणमूतये भगम् । १४ मेदसा देवा वपया यजध्वम् । १५ विष्णूवरुणा युवमध्वराय नः । १६ ययोरोजसा स्कभिता रजाꣳसि १७ विष्णूवरुणावभिशस्तिपा १८ अꣳहोमुचा वृषभा सुप्रतूर्ती ।

यो भ्रातृव्यवान्त्स्यात्स स्पर्धमानो वैष्णा वरुणीं (सं.२-१-४-१०) विष्णूवरुणौ देवते ॥

---

१९ मही नु द्यावापृथिवी इह ज्येष्ठे २० प्रपूर्वजे पितरा नव्यसीभिः । २१ स इत्स्वपा भुवनेष्वास । २२ भूरिं द्वे अचरन्ती चरन्तम् । २३ इदं द्यावापृथिवी सत्यमस्तु । २४ उर्वी पृथ्वी बहुले दूरे अन्ते ।

द्यावापृथिव्यां धेनुमालभेत ज्योगपरुद्धः(सं.२-१-४-१३)। द्यावापृथिवी देवते ॥

---

२५ या जाता ओषधयः★ २६ अति विश्वाः परिष्ठाः । ★ २७ या ओषधयः सोम राज्ञीः★ २८ अश्वावतीꣳ सोमवतीम् ।★ २९ ओषधीरिति मातरः★ ३० अन्या वो अन्यामवतु ★

ओषधीभ्यो वेहतमालभेत प्रजाकामः (सं.२-१-५-६) ओषधयःदेवताः ॥

---

**ब्रा.२-८-५**

१ शुचिं नु स्तोमꣳ ★ २ श्नथद्वृत्रम् । ★ ३ उभावामिन्द्राग्नी ★ ४ प्रचर्षणिभ्यः । ★ ५ आवृत्रहणा★ ६ गीर्भिर्विप्रः ।★

ऐन्द्राग्नं पुनरुत्सृष्टमालभेत (सं.२-१-५-९) इन्द्राग्नी देवते ॥

---

७ ब्रह्मणस्पते त्वमस्य यन्ता । ८ स ईꣳ सत्येभिः सखिभिः ९ ब्रह्मणस्पतेरभवद्यथा वशम् । १० इन्धानो अग्निं वनवद्वनुष्यतः । ११ ब्रह्मणस्पते सुयमस्य विश्वहा १२ स इज्जनेन स विशा सः

ब्राह्मणस्पत्यं तूपरमालभेताभिचरन् (सं.२-१-५-१२) ब्रह्मणस्पतिः देवता ॥

---

**ब्रा.२-८-५ -**

१३ यास्ते॑ पूष॒न्नावो॑ अ॒न्तः ।★
१४ शु॒क्रं ते॑ अ॒न्यत् ★
१५ पू॒षेमा आशाः॑ । ★
१६ प्रप॑थे प॒थाम॑जनिष्ट पू॒षा ।
१७ पू॒षा सु॒बन्धु॑र्दि॒व आ
१८ अ॒जाश्वः॑ पशु॒पा वाज॑बस्त्यः

पौ॒ष्ण१॒ श्या॒ममाल॑भे॒तान्न॑कामः (सं.२-१-६-३)   पूषा देवता ॥

---

१९ शुची॑ वो ह॒व्या म॑रुतः
२० प्रचि॒त्रम॒र्कं गृ॑ण॒ते तु॒राय॑ ।
२१ अ१॒ सेष्वा म॑रुतः खा॒दयो॑ वः ।
२२ या वः॒ शर्म॑ शशमा॒नाय॒ सन्ति॑
२३ इ॒मे तु॒रं म॒रुतो॑ रामयन्ति ।
२४ अ॒रा इ॒वेदच॑रमा अहे॑व ।

मा॒रु॒तं पृश्नि॒माल॑भे॒तान्न॑कामः (सं.२-१-६-५)   मरुतः देवताः ॥

---

२५ अनु॑ ते दायि म॒ह इ॑न्द्रि॒याय॑ ।
२६ य इन्द्र॒ शुष्मो॑ मघवन्ते॒ अस्ति॑
२७ इन्द्रो॒ राजा॒ जग॑तश्चर्षणी॒नाम् ।
२८ तमु॑ष्टुहि॒ यो अ॒भि भू॒त्योजाः ।
२९ स्थू॒रस्य॑ रा॒यो बृ॑ह॒तो य ईशे॑ ।
३० आ ते॒ शुष्मो॑ वृष॒भ ए॑तु

ऐ॒न्द्रम॑रु॒णमाल॑भेतेन्द्रिय का॑मः (सं.२-१-६-७)   इन्द्रः देवता ॥

---

**ब्रा.२-८-६**

१ आ दे॒वो या॑तु सवि॒ता सु॒रत्नः॑
२ अ॒भीवृ॑त॒ं कृश॑नैर्वि॒श्वरू॑पम्
३ सधा॑ नो दे॒वः स॑वि॒ता स॒वाय॑ ।
४ विजना॑ञ्छ्या॒वाः शि॑ति॒पादो॑ अख्यन्
५ वि सु॑प॒र्णो अ॒न्तरि॑क्षाण्यख्यत् ।
६ भगं॒ धियं॑ वा॒जय॑न्तः पुर॑न्धिम्

सा॒वि॒त्रमु॑पध्व॒स्तमाल॑भेत स॒निका॑मः (सं.२-१-६-९)   सविता देवता ॥

---

७ आ नो॒ विश्वे॒ अस्क्रा॑ गमन्तु दे॒वाः
८ शं नो॑ दे॒वा वि॒श्वदे॑वा भवन्तु ।
९ ये स॑वि॒तुः स॒त्य स॑वस्य॒ विश्वे॑ ।
१० अग्ने॑ या॒हि दू॒त्यं॑ वारि॑षेण्यः ।
११ द्यौः पित॒ः पृथि॑वि॒ मात॒रध्रु॑क्
१२ विश्वे॑ देवाः शृणु॒तेम१॒ हवं॑ मे

वै॒श्व॒दे॒वं ब॑हु रू॒पमाल॑भे॒तान्न॑कामः (सं.२-१-६-११)   विश्वेदेवाःदेवताः ॥
(आपस्तम्बिनां वैश्वदेव काण्ड व्रत उपक्रमे उत्सर्जने च विनियुज्यते ।)

---

१३ आ वा॑ मित्रावरुणा ह॒व्यजु॑ष्टिम्
१४ यु॒वं वस्त्रा॑णि पीव॒सा व॑साथे ।
१५ तत्सुवा॑ मित्रावरुणा महि॒त्वम् ।
१६ यद्व१॒हिष्ठं॒ नाति॒ विदे॑ सुदानू ।
१७ आ नो॑ मित्रावरुणा ह॒व्य-
१८ प्र बा॒हवा॑ सिसृतं जी॒वसे॑ नः

मै॒त्रा॒व॒रु॒णीं द्वि॑रू॒पामाल॑भेत॒ वृष्टि॑कामः (सं.२-१-७-४)   मित्रावरुणौ देवते ॥

---

१९ इ॒मा रु॒द्राय॑ स्थि॒रध॑न्वने॒ गिर॑ः
२० त्वा द॑त्तेभी रुद्र॒ शन्त॑मेभिः ।
२१अर्हन्॑बिभर्षि ★
२२ मा न॑स्तो॒के ★
२३ आते॑ पितर्मरुता१॒ सु॒म्नमे॑तु
२४ ए॒वा ब॑भ्रो वृषभ चेकितान ।

रौ॒द्री१॒ रोहि॑णी॒माल॑भेताभि॒ चरन्॒ (सं.२-१-७-१०)   रुद्रःदेवता ॥

२५ परि॑ णो रु॒द्रस्य॑ हे॒तिः ★
२६ स्तु॒हि श्रु॒तम् । ★
२७ मीढु॑ष्टम ★
२८ अर्ह॑न्बिभर्षि । ★
२९ त्वम॑ग्ने रु॒द्रः ★
३० आ वो॒ राजा॑नम् । ★

अस्मिन्नेव रौद्रे पशौ विकल्पिते सूक्ते षण्णां ऋचां प्रतीकानि ।
(रुद्र सूक्तम् - प्रतिसरजपे विनियुज्यते) रुद्रः देवता ।

---

**ब्रा.२-८-७**

१ सूर्यो॑ दे॒वीमु॒षस॒ꣳ रोच॑माना॒ मर्यः॑
२ भ॒द्रा अश्वा॑ ह॒रितः॑ सूर्य॑स्य ।
३ तत्सूर्य॑स्य दे॒व॒त्वं तन्म॑हि॒त्वम् ।
४ तन्मि॒त्रस्य॒ वरु॑णस्याभि॒चक्षे॑ ।
५ अ॒द्या दे॑वा॒ उदि॑ता॒ सूर्य॑स्य ।
६ दि॒वो रु॒क्म उ॑रु॒चक्षा॒ उदे॑ति ।
७ शं नो॒ भव॒ चक्ष॑सा॒ शं नः॑
८ चि॒त्रं दे॒वाना॒मुद॑गा॒दनी॑कम् ।

यो ब्र॑ह्मवर्च॒स का॑मः॒ स्यात् तस्मा॑ ए॒ताꣳ सौरीꣳ श्वे॒तां व॒शामाल॑भेत (सं.२-१-८-२) सूर्यः देवता ।
७-८ हविषः विकल्पिता पुरोनुवाक्या, याज्या

---

९ त्वष्टा॒ द॒ध॒त् ★
१० तन्न॑स्तु॒रीप॑म् । ★
११ त्वष्टा॑ वी॒रं ★
१२ पि॒शंग॑ रूपः । ★
१३ द॒शेमं त्वष्टु॑र्जनयन्त॒ गर्भ॑म् ।
१४ आवि॒ष्ट्यो॑ वर्ध॑ते॒ चारु॑रासु ।

त्वा॒ष्ट्रं व॑डबमाल॑भेत प॒शुका॑मः (सं.२-१-८-९) त्वष्टा देवता ।

---

१५ मि॒त्रो जना॒न् ★
१६ प्र स मि॑त्र । ★
१७ अ॒यं मि॒त्रो न॑म॒स्यः॑ सु॒शेवः॑ ।
१८ अ॒न॒मी॒वास॒ इड॑या॒ मद॑न्तः ।
१९ मि॒त्रं न ईꣳ शिम्या॒ गोषु॑
२० म॒हाꣳ आ॑दि॒त्यो नम॑सोप॒सद्यः॑

मै॒त्रꣳ श्वे॒तमाल॑भेत संग्रा॒मे संय॑त्ते सम॒यका॑मः (सं.२-१-८-११) मित्रः देवता ।

---

२१ आ वा॒ꣳ रथो॒ रोद॑सी बद्ब॒धानः॑
२२ स प॑प्रथा॒नो अ॒भि पञ्च॒ भूम॑ ।
२३ स्वश्वा॑ य॒शसाया॑तम॒र्वाक् ।
२४ यु॒वोः श्रि॒यं परि॒ योषा॑वृणीत ।
२५ यो ह॒ स्य वा॒ꣳ र॒थिरा॒ वस्तः॑
२६ यु॒वं भु॒ज्युमव॑ वि॒द्धꣳ समु॒द्रे ।

आ॒श्वि॒नं धू॒म्रल॑लाम॒माल॑भेत (सं.२-१-१०-१) अश्विनौ देवते ।

---

२७ अग्नीषोमा॒ यो अ॒द्य वा॑म् ।
२८ यो अ॒ग्नीषोमा॑ ह॒विषा॑ सप॒र्यात् ।
२९ अग्नीषोमा॒ य आहु॑तिं ।
३० अग्नीषोमा॒ चेति॒ तद्वी॒र्यं॑ वाम् ।
३१ अग्नीषोमावि॒मꣳसु॒मे ★
३२ अग्नीषोमा ह॒विषः॒ प्रस्थि॑तस्य । ★

अ॒ग्नी॒षो॒मीया॒माल॑भेत (सं.३-४-३-६) अग्नीषोमौ देवते ॥

---

<u>ब्रा.२-८-८</u>  (अयमनुवाकः उदकशान्ति जपे विनियुज्यते ।)

१ अ॒हम॑स्मि प्रथम॒जा ऋ॒तस्य॑ । ४ परा॑के अ॒न्नं निहि॑तं लो॒क ए॒तत् । ७ मोघ॒मन्नं॑ विन्दते॒ अप्र॑चेताः ।

२ पूर्वं॑म॒ग्नेरपि॑ दह॒त्यन्न॑म् । ५ म॒हान्तौ॑ च॒रू स॑कृद् दु॒ग्धेन॑ पप्रौ । ८ अ॒हं मे॒घः स्तनय॒न्वर्॒ष॑न्नस्मि ।

३ जहा॑म्य॒न्यं न ज॑हाम्य॒न्यम् । ६अन्नं॑ प्रा॒ण मन्न॑मपा॒नमा॑हुः ।

अष्टमे वेहतादि पशूनां सूक्तान्युच्यन्ते । ते च पशवः शाखान्तरे समाम्नाताः । तत्र सूत्रकारेणोदाहृतम् - सान्नाय्ये वेहतमालभेत इत्यस्य पशोः सूक्ते वपा, पुरोडाशहविषां पुरोनुवाक्या याज्या च । (गर्भघातिनी गौः वेहदित्युच्यते ।) (७-८ हविषः विकल्पिता पुरोनुवाक्या, याज्या)

---

९ दे॒वीं वाच॑मजनयन्त ★ ११ अ॒न॒न्तामन्ता॒दधि॒ निर्मि॑तां १३ वागक्षरं॑ प्रथम॒जा ऋ॒तस्य॑ ।

१० यद्वाग्वद॑न्ति । ★ १२ वाचं॑ दे॒वा उप॑ जीवन्ति॒ विश्वे॑ । १४ यामृष॑यो मन्त्र॒कृतो॑ मनी॒षिणः॑ ।

१५ च॒त्वारि॒ वाक्परि॑मिता प॒दानि॑ । (१५-हविषः विकल्पिता याज्या ।) यदुक्तं सूत्रकारेण वाचे वेहतम् इति- (अत्रैव उपहोमार्थं मन्त्रद्वयं) गौ॒रीमि॑माय, तस्या॑ समु॒द्राः (ब्रा.२-४-६-३१,३२) इति । वाक् देवता ।

---

१६ श्र॒द्धया॒ग्निः समि॑ध्यते । १८ यथा॑ दे॒वा असु॑रेषु । २० श्र॒द्धां प्रा॒तर्ह॑वामहे ।

१७ प्रि॒यꣳ श्र॑द्धे॒ दद॑तः । १९ श्र॒द्धां दे॑वा यज॑मानाः । २१ श्र॒द्धा दे॒वानधि॑ वस्ते ।

यदुक्तं सूत्रकारेण - श्रद्धायै वेहतम् इति- श्रद्धा देवता ।

---

२२ ब्रह्म॑जज्ञा॒नं प्र॑थ॒मं पु॒रस्ता॑त् । २४ ब्रह्म॑ दे॒वानजनयत् । २६ ब्रह्म॑न् दे॒वास्त्रय॑स्त्रिꣳशत् ।

२३ पि॒ता वि॒राजा॑मृष॒भो र॑यी॒णाम् । २५ अ॒न्तर॑स्मिन्नि॒मे लो॒काः । २७ चत॑स्र आशाः॒ प्रच॑रन्त्व॒ग्नयः॑ ।

यदुक्तं सूत्रकारेण ब्रह्मण ऋषभम् इति - (ब्रह्म सूक्तम्) ब्रह्म देवता ।
(ब्रह्म॑ ज्ये॒ष्ठाः, ब्रह्म॒ स्रुचः॑ इति द्वयम् ब्रा.२-४-७-२६,२७ द्रष्टव्यम्)

---

२८ आ गावो॑ अग्मन्नु॒त भ॒द्रम॑क्रन् । ३१ न ता अर्वा॒ ★ । ३४ प्र॒जाव॑तीः सू॒यव॑सꣳ रि॒शन्तीः॑ ।

२९ इन्द्रो॒ यज्व॑ने पृण॒ते च॑ शिक्षति । ३२ गावो॒ भगो॒ गाव॒ इन्द्रो॑ मे अच्छात् । ३५ उपे॒दमु॑प॒ पर्च॑नम् ।

३० न ता न॑शन्ति॒ ★ ३३ यूयं गा॑वो मेदयथा कृ॒शं चित् ।

यदुक्तं सूत्रकारेण 'आ गावो अग्मन्निति उपहोमाः' इति-। गावो देवताः ।

---

**ब्रा.२-८-९** (अयमनुवाकः उदकशान्ति जपे विनियुज्यते ।)

१ ता सूर्या चन्द्रमसा विश्वभृत्तमा ३ पती द्युमद्विश्व विदा उभा दिवः । ५ अस्य श्रवो नद्यः सप्त बिभ्रति

२ उभावन्तौ परियात अर्म्या । ४ विश्ववपरी प्रतरणा तरन्ता । ६ पूर्वापरं चरतो माययैतौ ।

यदुक्तं सूत्रकारेण 'सूर्या चन्द्रमोभ्यां यमौ श्वेतं च कृष्णं चैक यूपे' (यमौ एकस्मिन् गर्भे सहोत्पन्नौ) तयोः पश्वोः सूक्ते । सूर्या चन्द्रमसौ देवते ।

---

७ हिरण्यवर्णाः शुचयः पावकाः★ ९ यासां देवाः ★ ११ आपो भद्राः ★

८ यासाꣳ राजा । ★ १०शिवेन मा चक्षुषा पश्यत । ★ १२ आदित्पश्यामि । ★

यदुक्तं सूत्रकारेण अद्भ्यो वेहतम् इति, तस्य पशोः सूक्ते षण्णां ऋचां प्रतीकानि । आपः देवताः ।

---

१३ नासदासीन्नो सदासीत्तदानीम् । १६ कामस्तदग्रे समवर्तताधि । १९ इयं विसृष्टिर्यत आ बभूव ।

१४ न मृत्युरमृतं तर्हि न । १७ तिरश्चीनो विततो रश्मिरेषाम् २० किꣳ स्विद्वनं क उ स वृक्षः

१५ तम आसीत्तमसा गूढमग्रे प्रकेतम् ॥ १८ को अद्धा वेद क इह प्रवोचत् २१ ब्रह्म वनं ब्रह्म स वृक्षः

यदुक्तं सूत्रकारेण तत्र सलिलमुपजुहुयात् इति, तत्र पूर्वोक्ते कर्मणि नासदासीय सूक्त गतैः मन्त्रैः जलद्रव्येण उपहोमाः कर्तव्या इत्यर्थः ।

---

२२ प्रातरग्निं प्रातरिन्द्रꣳ हवामहे । २४ भग प्रणेतर्भग सत्यराधः । २६ भग एव भगवाꣳ अस्तु देवाः ।

२३ प्रातर्जितं भगमुग्रꣳ हुवेम । २५ उतेदानीं भगवन्तः स्याम । २७ समध्वरायोषसो नमन्त ।

२८ अश्वावतीर्गोमतीर्न उषासः । (हविषः विकल्पिता याज्या ॥)

यदुक्तं सूक्तकारेण भगाय वाशिताम् इति । (गर्भधारण योग्या वाशिता) तस्य पशोः सूक्ते । भगः देवता ।

---

॥ इति द्वितीयाष्टके अष्टमः प्रश्नः समाप्तः ॥

॥ शुभमस्तु नित्यम् ॥

★★★★★

॥ श्रीः ॥

# तैत्तिरीय ब्राह्मणे तृतीयाष्टके प्रथमः प्रश्नः ॥

**अग्निहोत्रादिकं कर्म द्वितीय काण्ड ईरितम् । नक्षत्रेष्ट्यादिकं कर्म तृतीये त्वथ वक्ष्यते ॥**

**आद्ये प्रपाठके पूर्व भागे याज्यानुवाक्यकाः । क्रमेणेष्टिषु वर्ण्यन्ते उत्तरस्मिंस्तदिष्टयः ॥**

**ब्रा. १-५-२-८ 'कृत्ति॑काः प्रथ॒मम् । विशा॑खे उत्त॒मम् । तानि॑ देव नक्ष॒त्राणि॑ । अनू॑राधाः प्रथ॒मम् । अ॒प॒भर॑णीरुत्त॒मम् । तानि॑ यमनक्ष॒त्राणि॑ ॥' तत्र प्रथमानुवाके देव नक्षत्राणां याज्यानुवाक्याः ।**

| मन्त्रभागः | ब्राह्मण भागः/सूत्रम्/भाष्यम् | देवता |
|---|---|---|
| **ब्रा.३-१-१** | | |
| १ अ॒ग्निर्नः॑ पा॒तु कृत्ति॑काः ।<br>२ यस्य॒ भान्ति॑ र॒श्मयो॒ यस्य॑ के॒तवः॑ | कृत्तिका नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | अग्निः |
| ३ प्र॒जाप॑ते रोहि॒णी वे॑तु॒ पत्नी᳚ ।<br>४ रो॒हि॒णी दे॒व्युद॑गात्पु॒रस्ता᳚त् । | रोहिणी नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | प्रजापतिः |
| ५ सोमो॒ राजा॑ मृगशी॒र्षेण॒ आग॑न् ।<br>६ यत्ते॒ नक्ष॑त्रं मृगशी॒र्॒षमस्ति॑ । | मृगशिरः नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | सोमः |
| ७ आ॒र्द्रया॑ रु॒द्रः प्रथ॑मान एति ।<br>८ हे॒ती रु॒द्रस्य॒ परि॑णो वृणक्तु । | आर्द्रा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | रुद्रः |
| ९ पुन॑र्नो॑ दे॒व्यदि॑तिः स्पृणोतु ।<br>१० ए॒वा न दे॒व्यदि॑तिरन॒र्वा॑ । | पुनर्वसू नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | अदितिः |
| ११ बृह॒स्पति॑ः प्रथ॒मं जाय॑मानः ।<br>१२ ति॒ष्य॑ः पु॒रस्ता॑दु॒त म॑ध्य॒तो न॑ः । | पुष्य नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | बृहस्पतिः |
| १३ इ॒दꣳ स॒र्पेभ्यो॑ ह॒विर॑स्तु॒ जुष्ट᳚म् ।<br>१४ ये रो॑च॒ने सू॒र्य॑स्यापि॑ स॒र्पाः । | आश्लेषा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | सर्पाः |
| १५ उप॑हूताः पि॒तरो॒ ये म॒घासु॑ ।<br>१६ ये अ॑ग्निद॒ग्धा येऽन॑ग्निदग्धाः । | मघा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | पितरः |
| १७ गवां॒ पति॒ः फल्गु॑नीनामसि<br>१८ येने॒मा विश्वा॒ भुव॑नानि॒ सञ्जि॑ता | पूर्व फल्गुनी नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | अर्यमा |

| | | |
|---|---|---|
| १९ श्रेष्ठो देवानां भगवो भगासि ।<br>२० भगो ह दाता भग इत्प्रदाता । | उत्तर फल्गुनी नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | भगः |
| २१ आयातु देवः सवितोपयातु ।<br>२२ हस्तः प्रयच्छत्वमृतं वसीयः । | हस्त नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या । | सविता |
| २३ त्वष्टा नक्षत्रमभ्येति चित्राम् ।<br>२४ तन्नस्त्वष्टा तदु चित्रा विचष्टाम् | चित्रा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या । | त्वष्टा |
| २५ वायुर्नक्षत्रमभ्येति निष्ट्याम् ।<br>२६ तन्नो वायुस्तदु निष्ट्या शृणोतु । | स्वाती नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या । | वायुः |
| २७ दूरमस्मच्छत्रवो यन्तु भीताः ।<br>२८ नक्षत्राणामधिपत्नी विशाखे । | विशाखा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या । | इन्द्राग्नी |
| २९ पूर्णा पश्चादुत पूर्णा पुरस्तात् ।<br>३० पृथ्वी सुवर्चा युवतिः सजोषाः | पौर्णमासी देवतायाः पुरोनुवाक्या, याज्या । | पौर्णमासी |

**ब्रा.३-१-२- यम नक्षत्राणां इष्टयः ।**

| | | |
|---|---|---|
| १ ऋध्यास्म हव्यैर्नमसोपसद्य ।<br>२ चित्रं नक्षत्रमुदगात्पुरस्तात् | अनूराधा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | मित्रः |
| ३ इन्द्रो ज्येष्ठामनु नक्षत्रमेति ।<br>४ पुरन्दराय वृषभाय धृष्णवे । | ज्येष्ठा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | इन्द्रः |
| ५ मूलं प्रजां वीरवतीं विदेय ।<br>६ अहंर्नो अद्य सुविते दधातु । | मूलनक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | निर्ऋतिः |
| ७ या दिव्या आपः पयसा संबभूवुः<br>८ याश्च कूप्या याश्च नाद्याः | पूर्वाषाढा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | आपः |
| ९ तन्नो विश्वे उप शृण्वन्तु देवाः ।<br>१० शुभ्राः कन्या युवतयः सुपेशसः | उत्तराषाढा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | विश्वे देवाः |
| ११ यस्मिन् ब्रह्माभ्यजयत्सर्वमेतत्<br>१२ उभौ लोकौ ब्रह्मणा सञ्जितेमौ | अभिजित् नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | ब्रह्म |

| | | |
|---|---|---|
| १३ शृ॒ण्वन्ति॑ श्रो॒णाम॒मृत॑स्य | श्रवण नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | विष्णुः |
| १४ त्रे॒धा विष्णु॑रुरुगा॒यो विच॑क्रमे । | | |
| १५ अ॒ष्टौ दे॒वा वस॑वः सो॒म्यास॑ः । | श्रविष्ठा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | वसवः |
| १६ य॒ज्ञं नः॑ पान्तु॒ वस॑वः पु॒रस्ता॑त् | | |
| १७ क्ष॒त्रस्य॒ राजा॒ वरु॑णोऽधि रा॒जः | शतभिषङ् नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | वरुणः |
| १८ य॒ज्ञं नो॒ राजा॒ वरु॑ण॒ उप॑यातु । | | |
| १९ अ॒ज एक॑पा॒दुद॑गात्पु॒रस्ता॑त् । | पूर्व प्रोष्ठपदा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | अज एकपात् |
| २० वि॒भ्राज॑मानः समिधा॒न उ॒ग्रः । | | |
| २१ अहि॑र्बु॒ध्नियः॒ प्रथ॑मान एति । | उत्तर प्रोष्ठपदा नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | अहिर्बुध्नियः |
| २२ च॒त्वार॒ एक॑म॒भिकर्म॑ दे॒वाः । | | |
| २३ पू॒षा रे॒वत्यन्वे॑ति॒ पन्था॑म् । | रेवती नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | पूषा |
| २४ क्षु॒द्रान्प॒शून्र॑क्षतु॒ रे॒वती॑ नः । | | |
| २५ तद॒श्विना॑वश्व॒युजोप॑याताम् । | अश्विनी नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | अश्विनौ |
| २६ यौ दे॒वानां॒ भि॒षजौ॑ हव्यवा॒हौ । | | |
| २७ अप॑ पा॒प्मानं॒ भर॑णीर्भरन्तु । | अप भरणी नक्षत्रस्येष्टौ पुरोनुवाक्या, याज्या | यमः |
| २८ यस्मि॒न्नक्ष॑त्रे य॒म एति॒ राजा॑ । | | |
| २९ नि॒वेश॑नी॒ ★ | अमावास्या देवतायाः याज्यानु वाक्ययोः प्रतीके । | अमावास्या |
| ३० यत्ते॑ दे॒वा अद॑धुः ।★ | | |

**ब्रा.३-१-३**

| | | |
|---|---|---|
| १ नवो॑नवो भवति॒ जाय॑मानो॒ ★ | चन्द्रमसेष्टौ याज्यानु वाक्ययोः प्रतीके | चन्द्रमाः |
| २ यमा॑दि॒त्या अ॒ꣳशुमा॑प्याय॒यन्ति ★ | | |
| ३ ये विरू॑पे॒ सम॑नसा संव्य॑यन्ती । | अहो रात्रेष्टौ पुरोनुवाक्या, याज्या | अहोरात्रे |
| ४ व॒यं दे॒वी ब्रह्म॑णा संविदा॒नाः । | | |
| ५ प्रत्यु॑व दृश्याय॒ती । | उषो देवताके यागे पुरोनुवाक्या, याज्या | उषाः |
| ६ तमो॒ ज्योति॑ष्कृणोति सू॒नरी॑ । | | |

| | | |
|---|---|---|
| ७ सं॒भक्ते॑न गमेमहि । <br> ८ प्र नक्ष॑त्राय दे॒वाय॑ । | नक्षत्र चरोः पुरोनुवाक्या, याज्या | नक्षत्रम् |
| ९ उदु॒त्यं ★ <br> १०चि॒त्रम् । ★ | सौर्य चरौ संयाज्ययोः प्रतीके | सूर्यः |
| ११ अदि॑तिर्न उरुष्यतु ★ <br> १२ म॒हीमू॒षु मा॒तर॑म् । ★ | अदितेः चरौ संयाज्ययोः प्रतीके | अदितिः |
| १३ इ॒दं विष्णुः ★ <br> १४ प्र तद्विष्णुः । ★ | वैष्णव चरौ संयाज्ययोः प्रतीके | विष्णुः |
| १५, १६अ॒ग्निर्मू॒र्धा भुवः । ★ | आग्नेयस्य चरोः संयाज्ययोः प्रतीके | अग्निः |
| १७ अनु॑नो॒ऽद्यानु॑मतिः ★ <br> १८ अन्वि॒द॑नुमते॒ त्वम् । ★ | अनुमति चरौ संयाज्ययोः प्रतीके | अनुमतिः |
| १९, २० ह॒व्य॒वाह॒ꣳ स्वि॑ष्टम् ।★ | सर्वसूक्तासु इष्टिषु स्विष्टकृतः संयाज्ययोः प्रतीके | अग्निः स्विष्टकृत् |

---

**ब्रा.३-५-६**

१ अ॒ग्निर्वृ॒त्राणि॑ जंघनत् ।

२ त्वꣳ सोमा॑सि॒ सत्प॑तिः ।

३ अ॒ग्निः प्र॒त्नेन॒ जन्म॑ना ।

४ सोमं॑ गी॒र्भिष्ट्वा॑ व॒यम् ।

इष्टि हौत्रे आज्य भागयोः पुरोनुवाक्ये । अग्निः, सोमः

---

**ब्रा.३-५-७**

१ अ॒ग्निर्मू॒र्धा दि॒वः क॒कुत् ।

२ भुवो॑ य॒ज्ञस्य॒ रज॑सश्च ने॒ता ।

३ प्रजा॑पते न॒त्वदे॒तान्य॒न्यः ।

४ स वे॑द पु॒त्रः पि॒तरꣳ स मा॒तर॑म् ।

५ अग्नीषो॒मा सवे॑दसा ।

६ यु॒वमे॒तानि॑ दि॒वि रो॑च॒नानि॑ ।

७ इन्द्रा॒ग्नी रोच॒ना दि॒वः ।

८ श्नथ॑द्वृ॒त्रमु॒त स॑नोति॒ वाज॑म् ।

९ एन्द्र॑ सान॒सिꣳ र॒यिम् ।

१० प्र॒स॑साहिषे पुरुहूत॒ शत्रू॑न् ।

११ म॒हाꣳ इन्द्रो य ओज॑सा ।

१२ म॒हाꣳ इन्द्रो॑ नृ॒वदाच॑र्षणि॒ प्राः

१३ पि॒प्री॒हि दे॒वाꣳ उ॑श॒तो य॑विष्ठ ।

१५ अग्ने॒ यद॒द्य वि॒शो अ॑ध्वरस्य

इष्टि हौत्रे हविषां याज्यानुवाक्याः । (सं.२-६-२ अपि पश्यत)

१४ अ॒ग्निꣳ स्वि॑ष्ट॒कृत॑म् । स्विष्ट कृतः याज्या

---

**ब्रा.३-५-१२**

१ आप्यायस्व ★ ४ तन्नस्तुरीपम्। ★ ७ अग्निर्होता गृहपतिः स राजा।
२ सं ते। ★ ५ देवानां पत्नीरुशतीरवन्तु नः। ८ वयमुत्वा गृहपते जनानाम्।
३ इह त्वष्टारमग्रियं ★ ६ उत ग्ना वियन्तु देव पत्नीः।

पत्नी संयाज्यानां याज्यानुवाक्याः।

---

**ब्रा.३-६-८**

१ आ वृत्रहणा वृत्रहभिः शुष्मैः। ३ विह्यख्यन् मनसा वस्य इच्छन्। ५ त्वामीडते अजिरं दूत्याय।
२ होता यक्षदिन्द्राग्नी। ४ होता यक्षदिन्द्राग्नी। ६ होता यक्षदग्निम्।

वपा पुरोडाश स्विष्टकृतां पुरोनुवाक्याः प्रैषाश्च। इन्द्राग्नी, अग्निः

---

**ब्रा.३-६-९**

१ गीर्भिर्विप्रः प्रमतिमिच्छमानः। २ मा च्छेद्म रश्मीं रिति नाधमानः ३ अग्निं सुदीतिं सुदृशं गृणन्तः

तेषामेव वपा पुरोडाश स्विष्टकृतां याज्याः। इन्द्राग्नी, अग्निः।

---

**ब्रा.३-६-११**

| | | |
|---|---|---|
| १ आ भरतं शिक्षतं वज्रबाहू।<br>२ होता यक्षदिन्द्राग्नी। | हविर्वनस्पति स्विष्टकृतानां पुरोनुवाक्याः प्रैषाश्च। | इन्द्राग्नी |
| ३ देवेभ्यो वनस्पते हवींषि।<br>४ होता यक्षद्वनस्पतिमभि हि। | | वनस्पतिः |
| ५ पिप्रीहि देवां उशतो यविष्ठ।<br>६ होता यक्षदग्निं स्विष्टकृतम्। | | अग्निः |

---

**ब्रा.३-६-१२**

१ उपो ह यद्विदथं वाजिनो गूः। तेषामेव याज्याः।
२ वनस्पते रशनयाऽभिधाय।
३ अग्निं स्विष्टकृतम्।

| | | |
|---|---|---|
| **ब्रा.३-१२-१**<br>१, २,तु॒भ्यं॒ ता अ॑ङ्गिरस्तमा॒ऽश्याम॒<br>तं का॑ममग्ने। ★ | दिवः श्येनि - इष्टीनां याज्यानुवाक्याः।<br>अ॒ग्नये॒ कामा॑य पु॒रो॒डाश॑म॒ष्टाक॑पालं<br>(ब्रा.३-१२-२-२) | अग्निः कामः |
| ३, ४ आशा॑नां त्वा॒ ★<br>विश्वा॒ आशाः॑ ★ | 'आ॒शायै॑ च॒रुं' (ब्रा.३-१२-२-२) | आशा |
| ५, ६ अनु॑नो॒ऽद्यानु॑मति॒ - ★<br>रन्विद॑नुमते॒ त्वम्॒ ★ | 'अनु॑मत्यै च॒रुं' (ब्रा.३-१२-२-२) | अनुमतिः |
| ७, ८ कामो॑ भू॒तस्य॒ का॒मस्तदग्रे॑ ★ | 'कामा॑य च॒रुं' (ब्रा.३-१२-२-४) | कामः |
| ९, १०ब्रह्म॑ जज्ञानं ★<br>पि॒ता वि॒राजा॑म्॒ ★ | 'ब्रह्म॑णे च॒रुं' (ब्रा.३-१२-२-५) | ब्रह्म। |
| ११, १२,य॒ज्ञो रा॒यो॑ऽयं य॒ज्ञः। ★ | 'य॒ज्ञा॑य च॒रुं' (ब्रा.३-१२-२-६) | यज्ञः। |
| १३ १४ आपो॑ भ॒द्राः ★<br>आदित्प॑श्यामि ★ | 'अ॒द्भ्यश्च॒रुं' (ब्रा.३-१२-२-७) | आपः। |
| १५ १६ तुभ्यं॑ भरन्ति॒ यो दे॒ह्यः ★ | 'अ॒ग्नये॑ बलि॒मते॑ च॒रुं' (ब्रा.३-१२-२-८) | अग्निर्बलिमान्। |
| १७ १८ पूर्वं॑ दे॒वा अप॑रेण, ★<br>प्राणापा॒नौ ★ | 'अनु॑वित्यै च॒रुं' (ब्रा.३-१२-२-९) | अनुवित्तिः। |
| १९ २०ह॒व्यवा॒हꣳ॒ स्वि॑ष्टम्। ★ | स्विष्टकृद्धविषः पुरोनुवाक्या, याज्या | अग्निः स्विष्टकृत् |

**ब्रा.३-१२-३- अपाघाख्यानां इष्टीनां पुरोनुवाक्या, याज्या।**

| | | |
|---|---|---|
| १ तप॑सा दे॒वा दे॒वता॒मग्रं॑ आयन्। <br>२ प्र॒थ॒म॒जꣳ दे॒वꣳ ह॒विषा॑ विधेम। | 'तप॑से च॒रुं' (ब्रा.३-१२-४-२) | तपः |
| ३ श्र॒द्धया दे॑वो दे॒व॒त्वम॑श्नुते। <br>४ श्र॒द्धा दे॒वी प्र॑थम॒जा ऋ॒तस्यं॑। | 'श्र॒द्धा॑यै च॒रुं' (ब्रा.३-१२-४-३) | श्रद्धा |
| ५ आगा॑त्स॒त्यꣳ ह॒विरि॒दं जु॑षा॒णम्॒ <br>६ यस्यं॑ प्रति॒ष्ठोर्वन्त॑रि॑क्षम्। | 'स॒त्या॑य च॒रुं' (ब्रा.३-१२-४-४) | सत्यम् |

| | | |
|---|---|---|
| ७ मन॑सो॒ वशे॒ सर्वे॑मि॒दं ब॑भूव ।<br>८ आकू॑तीना॒मधि॑पति॒ं चेत॑सां च । | ‘मन॑से च॒रुं’ (ब्रा.३-१२-४-५) | मनः |
| ९ चर॑णं प॒वित्रं॒ वित॑तं पु॒राण॑म् ।<br>१० लो॒कस्य॒ द्वार॑मर्चि॒मत्प॒वित्र॑म्ँ । | ‘चर॑णाय च॒रुं’ (ब्रा.३-१२-४-६ | चरणम् । |
| ११ १२ अ॒ग्निर्मू॒र्धा भुवः॑ ।★ | ‘आ॒ग्ने॒यम॒ष्टाक॑पालं’ (ब्रा.३-१२-४) | अग्निः । |
| १३ १४ अनु॑नो॒ऽद्यानु॑मति-★<br>रन्विद॑नुमते॒ त्वम् । ★ | ‘अनुमत्यै च॒रुं’ (ब्रा.३-१२-४) | अनुमतिः |
| १५ १६ ह॒व्य॒वा॒हꣳ॒ स्वि॑ष्टम् । ★ | स्विष्टकृतः पुरोनुवाक्या, याज्या । | अग्निः स्विष्टकृत् । |
| **आ. ३-१५**<br>१ हरि॒ꣳ॒ हर॑न्तमनु॑यन्ति दे॒वाः ।<br>२ मा छि॑दो मृत्यो॒ मा व॑धीः ।<br>३ स॒ध्य्रश्चं॑क॒मानाय॑ ।<br>४ कामे॑न मे काम॒ आगा॑त्<br>५ परं॑ मृत्यो॒ अनु॒परे॑हि॒ पन्था॑म् ।<br>६ प्रपू॒र्व्यं मन॑सा॒ वन्द॑मानः । | ‘मृत्यवे वेह॒तं’ इत्यत्र पशौ वपायाः पुरोडाशस्य, हविषः इति द्वे द्वे याज्यानुवाक्ये षडृचः ।<br>(भट्ट भास्करः) | मृत्युः |

★प्रतीकम्

॥ इति याज्या पुरोऽनुवाक्या सङ्ग्रहः समाप्तः ॥

॥ शुभमस्तु नित्यम् ॥

*******

# ३. तैत्तिरीय यजुर्वेदान्तर्गत ‘प्रतीक’ मन्त्राः ॥

| प्रतीकम् | | मन्त्र भागः |
|---|---|---|
| सं.१-४-४६-१३ | उद॑ग्ने॒ शुच॑यः | सं.१-३-१४-२८ |
| सं.१-४-४६-१४ | वि ज्योति॑षा | सं.१-२-१४-१७ |
| सं.१-५-११-१३ | अ॒ग्निर्मू॒र्धा | सं.४-४-४-१ |
| सं.१-५-११-१४ | भुवो॑ य॒ज्ञस्य॑ | सं.४-४-४-४ |
| सं.२-१-११-१ | इन्द्रं॑ वो वि॒श्वत॑ः | सं.१-६-१२-१ |
| सं.२-१-११-२ | इन्द्रं॒ नर॑ः | सं.१-६-१२-२ |
| सं.२-१-११-३ | मरु॑तो॒ यद्ध॑ वः | सं.१-५-११-१५ |
| सं.२-१-११-४ | या व॒ः शर्म॑ | सं.१-५-११-१६ |
| सं.२-२-१२-१ | हि॒र॒ण्य॒ग॒र्भः | सं.४-१-८-१३ |
| सं.२-२-१२-२ | आपो॑ ह॒ यद् | सं.४-१-८-१९ |
| सं.२-२-१२-३ | प्रजा॑पते | सं.१-८-१४-१२ |
| सं.२-२-१२-५ | उदु॒त्यं | सं.१-४-४३-१ |
| सं.२-२-१२-६ | चि॒त्रम् | सं.१-४-४३-२ |
| सं.२-२-१२-२३ | मा नो॑ मर्धीः | सं.१-७-१३-७ |
| सं.२-२-१२-२४ | आ तू॒ भ॑र | सं.१-७-१३-८ |
| सं.२-३-१४-१ | स प्र॑त्न॒वत् | सं.२-२-१२-७ |
| सं.२-३-१४-२ | नि काव्या॑ | सं.२-२-१२-८ |
| सं.२-३-१४-१२ | आप्या॑यस्व | सं.४-२-७-१२ |
| सं.२-३-१४-१३ | सं ते॒ पया॑ꣳसि | सं.४-२-७-१३ |
| सं.२-४-१२-१ | आयु॑ष्टे | सं.१-३-१४-११ |
| सं.२-५-१२-२ | आ॒यु॒र्दाः | सं.१-३-१४-१२ |
| सं.२-५-१२-५ | अव॑ ते॒ हेड॑ः | सं.१-५-११-९ |
| सं.२-५-१२-६ | उदु॑त्त॒मं | सं.१-५-११-१० |
| सं.२-५-१२-७ | प्रणो॑ दे॒वी | सं.१-८-२२-३ |
| सं.२-५-१२-८ | आ नो॑ दि॒वः | सं.१-८-२२-४ |

| | | |
|---|---|---|
| सं.२-५-१२-९ | अग्ना॑ विष्णू॒ | सं.१-८-२२-१ |
| सं.२-५-१२-१० | अग्ना॑ विष्णू॒ | सं.१-८-२२-२ |
| सं.२-५-१२-११ | इ॒मं मे॑ वरुण | सं.२-१-११-२१ |
| सं.२-५-१२-१२ | तत्वा॑ यामि | सं.२-१-११-२२ |
| सं.२-५-१२-२० | आ नो॑ मित्रावरुणा | सं.१-८-२२-८ |
| सं.२-५-१२-२१ | प्र बा॒हवा᳚ | सं.१-८-२२-९ |
| सं.२-५-१२-२६ | वि पाज॑सा | सं.४-१-५-१ |
| सं.२-५-१२-३० | अ॒ꣳहो॒मुचे᳚ | सं.१-६-१२-९ |
| सं.२-५-१२-३१ | वि॒वे॒षयन्मा᳚ | सं.१-६-१२-१० |
| सं.२-५-१२-३२ | वि न॑ इन्द्र | सं.१-६-१२-१२ |
| सं.२-५-१२-३३ | इन्द्र॑ क्ष॒त्रं | सं.१-६-१२-१३ |
| सं.२-५-१२-३४ | इ॒न्द्रि॒याणि॑ शतक्रतो | सं.१-६-१२-३ |
| सं.२-५-१२-३५ | अनु॑ ते दायि | सं.१-६-१२-४ |
| सं.२-६-११-२१ | स वे॑द पु॒त्रः | सं.२-२-१२-४ |
| सं.२-६-११-२२ | सोमा॑ पूषणा | सं.१-८-२२-१८ |
| सं.२-६-११-२३ | इ॒मौ दे॒वौ | सं.१-८-२२-१९ |
| सं.३-३-११-१७ | सिनीवालि | सं.३-१-११-१५ |
| सं.३-३-११-१८ | या सु॑पा॒णिः | सं.३-१-११-१६ |
| सं.४-१-११-५ | त्वं न॑ः सोम | सं.२-३-१४-५ |
| सं.४-१-११-६ | या ते॒ धामा॑नि दि॒वि | सं.२-३-१४-६ |
| सं.४-१-११-१५ | विश्वे॑ दे॒वाः | सं.२-४-१४-१६ |
| सं.४-१-११-१६ | विश्वे॑ देवाः | सं.२-४-१४-१७ |
| सं.४-१-११-२१ | शन्नो॑ भवन्तु (मि॒तद्रवः-- शन्नो॑ भवन्तु) | सं.१-७-८-१२ |
| सं.४-१-११-२२ | वाजे॑ वाजे | सं.१-७-८-९ |
| सं.४-२-११-११ | अग्ने॒ नय॑ | सं.१-१-१४-९ |
| सं.४-२-११-१२ | आ दे॒वाना᳚ | सं.१-१-१४-१० |
| सं.४-२-११-१९ | त्वं नो॑ अग्ने | सं.२-५-१२-२२ |

| | | |
|---|---|---|
| सं.४-२-११-२० | स त्वं नो अग्ने | सं.२-५-१२-२३ |
| सं.४-३-१३-२८ | इन्द्राग्नी रोचना | सं.४-२-११-१ |
| सं.४-३-१३-२९ | श्नथद्वृत्रं | सं.४-२-११-२ |
| सं.४-३-१३-३२ | विश्वकर्मन् हविषा वावृधानः | सं.४-६-२-१५ |
| सं.४-३-१३-३३ | विश्वकर्मन् हविषा वर्धनेन | सं.४-६-२-१६ |
| सं.४-४-१२-१५ | वैश्वानरो नः | सं.१-५-११-१ |
| सं.४-४-१२-१६ | पृष्टो दिवि | सं.१-५-११-४ |
| सं.४-४-१२-१७ | अनु नोऽद्यानुमतिः | सं.३-३-११-११ |
| सं.४-४-१२-१८ | अन्विदनुमते त्वं | सं.३-३-११-१२ |
| सं.४-४-१२-१९ | कया नश्चित्र आ | सं.४-२-११-९ |
| सं.४-४-१२-२० | को अद्य युङ्क्ते | सं.४-२-११-१० |
| ब्रा.१-५-१-२८ | पूर्णा पश्चात् | सं.३-५-१-१ |
| ब्रा. १-५-१-२९ | यत्ते देवा अदधुः | सं.३-५-१-२ |
| ब्रा.२-५-५-१० | विचक्रमे पृथिवीं | ब्रा.२-४-३-१२ |
| ब्रा.२-५-५-११ | त्रिर्देवः पृथिवीं | ब्रा.२-४-३-१३ |
| ब्रा.२-६-३-८ | अग्न आयूꣳषि | सं.१-३-१४-२३ |
| ब्रा.२-६-३-९ | अग्ने पवस्व | सं.१-३-१४-२४ |
| ब्रा.२-६-३-१० | पवमानः सुवर्जनः | ब्रा.१-४-८-१ |
| ब्रा.२-६-३-११ | पुनन्तु मा देवजनाः | ब्रा.१-४-८-२ |
| ब्रा.२-६-३-१२ | जातवेदः पवित्रवत् | ब्रा.१-४-८-३ |
| ब्रा.२-६-३-१३ | यत्ते पवित्रमर्चिषि | ब्रा.१-४-८-४ |
| ब्रा.२-६-३-१४ | उभाभ्यां देवसवितः | ब्रा.१-४-८-५ |
| ब्रा.२-६-३-१५ | वैश्वदेवी पुनती | ब्रा.१-४-८-६ |
| ब्रा.२-६-९-१ | आचर्षणि प्राः | ब्रा.२-४-३-२६ |
| ब्रा.२-६-९-३ | तꣳ सध्रीचीः | ब्रा.२-४-५-४ |
| ब्रा.२-६-१६-१ | उशन्तस्त्वा हवामहे | सं.२-६-१२-१ |
| ब्रा.२-६-१६-२ | आ नो अग्ने सुकेतुना | ब्रा.२-४-५-७ |

| | | |
|---|---|---|
| ब्रा.२-६-१६-३ | त्वꣳ सो॑म म॒हे भग॓ꣳ | ब्रा.२-४-५-८ |
| ब्रा.२-६-१६-४ | त्वꣳ सो॑म॒ प्रचि॑कितः | सं.२-६-१२-२ |
| ब्रा.२-६-१६-५ | त्वया॒ हि नः॑ पि॒तरः॑ | सं.२-६-१२-३ |
| ब्रा.२-६-१६-६ | त्वꣳ सो॑म पि॒तृभिः॑ | सं.२-६-१२-४ |
| ब्रा.२-६-१६-७ | बर्हि॑षदः पितरः | सं.२-६-१२-६ |
| ब्रा.२-६-१६-८ | आऽहं पि॒तॄन् | सं.२-६-१२-७ |
| ब्रा.२-६-१६-९ | उप॑हूताः पि॒तरः॑ | सं.२-६-१२-८ |
| ब्रा.२-६-१६-१० | अग्नि॑ष्वात्ताः पितरः | सं.२-६-१२-५ |
| ब्रा.२-६-१६-१४ | यद॑ग्ने कव्यवाहन | सं.२-६-१२-१२ |
| ब्रा.२-६-१६-१५ | त्वम॑ग्न ईडि॒तो जा॑तवेदः | सं.२-६-१२-१३ |
| ब्रा.२-६-१६-१६ | मात॑ली क॒व्यैः | सं.२-६-१२-१४ |
| ब्रा.२-७-८-३ | अ॒ङ्क्तौ न्य॒ङ्क्ताव॒भित॑ः | सं.१-७-७-८ |
| ब्रा.२-७-८-४ | आति॑ष्ठ वृत्रह॒न्रथम्॓ | सं.१-४-३७-१ |
| ब्रा.२-७-१६-८ | आ॒तिष्ठ॑न्तं॒ परि॑ | ब्रा.२-७-८-५ |
| ब्रा.२-७-१६-९ | अनु॒ त्वेन्द्रो॑ मदतु | ब्रा.२-७-८-६ |
| ब्रा.२-७-१६-१० | अनु॑ त्वा मि॒त्रावरु॑णौ | ब्रा.२-७-८-७ |
| ब्रा.२-८-१-३ | आ वा॑यो भूष | सं.१-४-४-१ |
| ब्रा.२-८-१-४ | प्र याभिः॑ | सं.२-२-१२-२८ |
| ब्रा.२-८-१-२० | अस्त॑भ्ना॒द् द्यां | सं.१-२-८-५ |
| ब्रा.२-८-१-२१ | यत्किञ्चे॒दं | सं.३-४-११-१९ |
| ब्रा.२-८-१-२२ | कि॒त॒वास॑ः | सं.३-४-११-२० |
| ब्रा.२-८-१-२५ | आ॒दि॒त्याना॒मव॑सा | सं.२-१-११-२० |
| ब्रा.२-८-१-२६ | न द॑क्षि॒णा | सं.२-१-११-१९ |
| ब्रा.२-८-१-२७ | धा॒रय॑न्त आदि॒त्यास॑ः | सं.२-१-११-१६ |
| ब्रा.२-८-१-२८ | ति॒स्रो भूमी॓र्धारयन् | सं.२-१-११-१७ |
| ब्रा.२-८-१-२९ | य॒ज्ञो दे॒वाना॓ꣳ | सं.२-१-११-१४ |
| ब्रा.२-८-१-३० | शुचि॑र॒पः | सं.२-१-११-१५ |
| ब्रा.२-८-२-१४ | यु॒जे रथ॓ꣳ | ब्रा.२-४-१-८ |

| | | |
|---|---|---|
| ब्रा.२-८-२-१९ | आ वे॒धसं᳚ | ब्रा.२-५-५-१२ |
| ब्रा.२-८-२-२० | स हि शु॒चिः॑ | ब्रा.२-५-५-१३ |
| ब्रा.२-८-२-२३ | बृह॑स्पते॒ परि॑ | सं.४-६-४-४ |
| ब्रा.२-८-२-२४ | ए॒वा पि॒त्रे | सं.१-८-२२-६ |
| ब्रा.२-८-२-२६ | पावी॑रवी | सं.४-१-११-१० |
| ब्रा.२-८-२-२७ | इ॒मा जु॒ह्वा॑ना | ब्रा.२-४-६-२ |
| ब्रा.२-८-२-२८ | यस्ते॒ स्तनः॑ | आ.४-८-८ |
| ब्रा.२-८-२-२९ | सर॑स्वत्य॒भिनो॑ नेषि | ब्रा.२-४-३-३ |
| ब्रा.२-८-३-२ | अषा॑ढं यु॒त्सु | ब्रा.२-४-३-२० |
| ब्रा.२-८-३-३ | त्वꣳसोम॒ क्रतु॑भिः | ब्रा.२-४-३-१९ |
| ब्रा.२-८-३-४ | या ते॒ धामा॑नि ह॒विषा᳚ | सं.१-२-१०-६ |
| ब्रा.२-८-३-७ | विष्णो॒र्नुकं᳚ | सं.१-२-१३-९ |
| ब्रा.२-८-३-८ | तद॑स्य प्रि॒यम् | ब्रा.२-४-६-४ |
| ब्रा.२-८-३-९ | प्र तद्विष्णुः॑ | ब्रा.२-४-३-१० |
| ब्रा.२-८-३-१३ | आ ते॑ म॒हः | सं.१-७-१३-६ |
| ब्रा.२-८-३-१४ | यो जा॒त ए॒व | सं.१-७-१३-५ |
| ब्रा.२-८-३-१५ | अ॒भि गो॒त्राणि॑ | सं.४-६-४-७ |
| ब्रा.२-८-४-७ | अन॑वस्ते॒ रथं᳚ | सं.१-६-१२-१८ |
| ब्रा.२-८-४-८ | वृष्णे॒ यत्ते᳚ | सं.१-६-१२-१९ |
| ब्रा.२-८-४-९ | इन्द्र॑स्य॒ नु वी॒र्या॑णि | ब्रा.२-५-४-३ |
| ब्रा.२-८-४-१० | अह॒न्नहि᳚म् | ब्रा.२-५-४-४ |
| ब्रा.२-८-४-२५ | या जा॒ता ओष॑धयः | सं.४-२-६-१ |
| ब्रा.२-८-४-२६ | अति॒ विश्वाः᳚ परि॒ष्ठाः | सं.४-२-६-११ |
| ब्रा.२-८-४-२७ | या ओष॑धय॒ः सोम॑राज्ञीः | सं.४-२-६-१६ |
| ब्रा.२-८-४-२८ | अ॒श्वा॒वतीꣳ सोमव॒तीं | सं.४-२-६-१४ |
| ब्रा.२-८-४-२९ | ओष॑धी॒रिति॑ मातरः | सं.४-२-६-४ |
| ब्रा.२-८-४-३० | अ॒न्या वो॑ अ॒न्याम॑वतु | सं.४-२-६-९ |
| ब्रा.२-८-५-१ | शुचिं॒ नु स्तोमं᳚ | सं.१-१-१४-४ |

| | | |
|---|---|---|
| ब्रा.२-८-५-३ | उ॒भा वा॑मिन्द्राग्नी | सं.१-१-१४-१ |
| ब्रा.२-८-५-४ | प्रच॑र्ष॒णिभ्यः॑ | सं.४-२-११-३ |
| ब्रा.२-८-५-५ | आ वृ॑त्र॒हणा | ब्रा.३-६-८-१ |
| ब्रा.२-८-५-६ | गी॒र्भिर्विप्रः॑ | ब्रा.३-६-९-१ |
| ब्रा.२-८-५-१३ | यास्ते॑ पूष॒न्नावो॑ अ॒न्तः | ब्रा.२-५-५-१५ |
| ब्रा.२-८-५-१४ | शु॒क्रं ते॑ अ॒न्यत् | सं.४-१-११-१२ |
| ब्रा.२-८-५-१५ | पू॒षेमा आशाः॑ | ब्रा.२-४-१-१४ |
| ब्रा.२-८-६-२१ | अर्ह॑न् बिभर्षि | आ.४-५-१७ |
| ब्रा.२-८-६-२२ | मान॑स्तो॒के | सं.३-४-१२-८ |
| ब्रा.२-८-६-२५ | परि॑ णो रु॒द्रस्य॑ | सं.४-५-१०-९ |
| ब्रा.२-८-६-२६ | स्तु॒हि श्रु॒तं | सं.४-५-१०-८ |
| ब्रा.२-८-६-२७ | मीढु॑ष्टम | सं.४-५-१०-१० |
| ब्रा.२-८-६-२९ | त्वम॑ग्ने रु॒द्रः | सं.१-३-१४-१ |
| ब्रा.२-८-६-३० | आ वो॒ राजा॑नं | सं.१-३-१४-२ |
| ब्रा.२-८-७-९ | त्वष्टा॒ दध॑त् | ब्रा.२-६-८-९ |
| ब्रा.२-८-७-१० | तन्न॑स्तु॒रीप॒मध॑ | सं.३-१-११-६ |
| ब्रा.२-८-७-११ | त्वष्टा॑ वी॒रं | सं.५-१-११-९ |
| ब्रा.२-८-७-१२ | पि॒शङ्ग॑ रूपः | सं.३-१-११-८ |
| ब्रा.२-८-७-१५ | मि॒त्रो जनान्॑ | सं.३-४-११-१६ |
| ब्रा.२-८-७-१६ | प्र स मि॑त्र | सं.३-४-११-१७ |
| ब्रा.२-८-७-३१ | अग्नी॑षोमावि॒म९सुमे॑ | सं.२-३-१४-९ |
| ब्रा.२-८-७-३२ | अग्नी॑षोमा ह॒विषः॑ | सं.२-३-१४-११ |
| ब्रा.२-८-८-९ | दे॒वीं वाच॑मजनयन्त | ब्रा.२-४-६-२९ |
| ब्रा.२-८-८-१० | यद्वाग्वद॑न्ति | ब्रा.२-४-६-३० |
| ब्रा.२-८-८-३० | न ता न॑शन्ति | ब्रा.२-४-६-२५ |
| ब्रा.२-८-८-३१ | न ता अर्वा᳚ | ब्रा.२-४-६-२६ |
| ब्रा.२-८-९-७ | हिर॑ण्य वर्णाः॒ शुच॑यः | सं.५-६-१-१ |

| | | |
|---|---|---|
| ब्रा.२-८-९-८ | यासा॒ᳲ राजा॑ | सं.५-६-१-२ |
| ब्रा.२-८-९-९ | यासा॑ दे॒वा दि॒वि | सं.५-६-१-३ |
| ब्रा.२-८-९-१० | शि॒वेन॑ मा॒ चक्षु॑षा | सं.५-६-१-४ |
| ब्रा.२-८-१-११ | आपो॑ भ॒द्राः | सं.५-६-१-९ |
| ब्रा.२-८-१-१२ | आदित्प॑श्यामि | सं.५-६-१-१० |
| ब्रा.३-१-२-२९ | नि॒वेश॑नी स॒ङ्गम॑नी | सं.३-५-१-३ |
| ब्रा.३-१-३-१ | नवो॑नवो भवति | सं.२-४-१४-१ |
| ब्रा.३-२-३-२ | यमा॑दि॒त्या अ॒ᳲशुं | सं.२-४-१४-२ |
| ब्रा.३-१-३-११ | अदि॑तिर्न उरुष्यतु | सं.१-५-११-१७ |
| ब्रा.३-१-३-१२ | म॒हीमू॒षु मा॒तर॑ | सं.१-५-११-१८ |
| ब्रा.३-१-३-१९ | ह॒व्य॒वाह॑मभिमाति॒षाह॑ | ब्रा.२-४-१-९ |
| ब्रा.३-१-३-२० | स्वि॑ष्टमग्ने | ब्रा.२-४-१-१० |
| ब्रा.३-७-८-७ | न वा उ॑ वे॒तन्म्रि॑यसे | ब्रा.३-७-७-१७ |
| ब्रा.३-७-११-१२ | त्वम॑ग्ने अ॒यासि॑ | ब्रा.२-४-१-२३ |
| ब्रा.३-१२-१-१ | तुभ्यं॒ ता अ॑ङ्गिरस्तम | सं.१-३-१४-७ |
| ब्रा.३-१२-१-२ | अ॒श्याम॒ तं काम॑मग्ने | सं.१-३-१४-८ |
| ब्रा.३-१२-१-३ | आशा॑नां त्वाऽऽशा- | ब्रा.२-५-३-८ |
| ब्रा.३-१२-१-४ | विश्वा॒ आशा॒ मधु॑ना | ब्रा.२-५-३-९ |
| ब्रा.३-१२-१-७ | कामो॑ भू॒तस्य॑ | ब्रा.२-४-१-२५ |
| ब्रा.३-१२-१-८ | काम॒स्तदग्रे॑ | ब्रा.२-४-१-२६ |
| ब्रा.३-१२-१-९ | ब्रह्म॑ ज॒ज्ञानं | सं.४-२-८-४ |
| ब्रा.३-१२-१-१० | पि॒ता वि॒राजा॑ | ब्रा.२-८-८-२३ |
| ब्रा.३-१२-१-११ | य॒ज्ञो रा॒यो य॒ज्ञ ईशे॑ | ब्रा.२-५-५-१ |
| ब्रा.३-१२-१-१२ | अ॒यं य॒ज्ञो व॑र्धतां | ब्रा.२-५-५-२ |
| ब्रा.३-१२-१-१५ | तुभ्यं॑ भरन्ति | ब्रा.२-४-७-२३ |
| ब्रा.३-१२-१-१६ | यो दे॒ह्यो अन॑मयत् | ब्रा.२-४-७-२४ |
| ब्रा.३-१२-१-१७ | पूर्वं॑ दे॒वा अप॑रेण | ब्रा.२-५-६-१२ |
| ब्रा.३-१२-१-१८ | प्रा॒णा॒पा॒नौ चक्षुः॑ | ब्रा.२-५-६-१३ |

| | | |
|---|---|---|
| आ.१-११-३ | ब्र॒ह्मा दे॒वाना᳚ं | सं.३-४-११-४ |
| आ.१-१२-१३ | वा॒श्रेव॑ वि॒द्युत्॒ | सं.३-१-११-२२ |
| आ.१-१३-४ | सु॒त्रामा॑णं | सं.१-५-११-१९ |
| आ.१-१३-१२ | ह॒ꣳ॒सः शु॑चि॒षत्॒। | सं.१-८-१५-१८ |
| आ.१-१३-१४ | तदित्प॒दं | ब्रा.३-७-१०-१२ |
| आ.१-१९-५ | आ यस्मि᳚न्त्स॒प्त वा॑स॒वाः | सं.१-६-१२-५ |
| आ.१-२७-७ | युवा॑ सु॒वासा᳚ः | ब्रा.३-६-१-७ |
| आ.१-२७-१८ | श॒तमिन्नु श॒रद॑ः। | मं.प्र.२-४-३ |
| आ.२-३-९ | यन्मयि॑ मा॒ता | ब्रा.३-७-१२-८ |
| आ.२-३-१० | यदा॑ पि॒पेष॑ | ब्रा.३-७-१२-९ |
| आ.२-३-११ | यद॒न्तरि॑क्षं | ब्रा.३-७-१२-१० |
| आ.२-३-१२ | यदा॒शसा᳚ | ब्रा.३-७-१२-११ |
| आ.२-३-१३ | अति॑क्रामामि | ब्रा.३-७-१२-१२ |
| आ.२-३-१४ | त्रि॒ ते दे॒वाः | ब्रा.३-७-१२-१३ |
| आ.२-३-१५ | दि॒वि जा॒ताः | ब्रा.३-७-१२-१४ |
| आ.२-३-१६ | यदापो॒ नक्त᳚ं | ब्रा.३-७-१२-१५ |
| आ.४-११-२५ | उद्व॒यं तम॑स॒स्परि॑ | सं.४-१-७-१० |
| आ.४-२०-१७ | वय॑ः सुप॒र्णाः | ब्रा.२-५-८-७ |
| आ.६-४-१२ | अश्म॑न्वती | आ.६-३-१० |
| आ.६-४-१३ | यद्वै दे॒वस्य॑ सवि॒तुः | आ.६-३-११ |
| आ.६-४-१४ | या रा॒ष्ट्रात्प॒न्नात्॒ | आ.६-३-१२ |
| आ.६-४-१६ | धा॒ता पु॑नातु। | आ.६-३-१४ |
| आ.६-९-६ | लो॒कं पृ॑ण | सं.४-२-४-१३, ब्रा.३-११-६-२ |
| आ.६-९-७ | ता अ॑स्य॒ सूद॑ दोहसः | सं.४-२-४-१४ |
| मं.प्र.१-२-७ | आ॒शासा॒नेत्ये॒षा | सं.१-१-१०-७ |
| मं.प्र.१-६-२ | यु॒ञ्जन्ति॑ ब्र॒ध्नम्॒ | सं.४-७-२०-९ |
| मं.प्र.१-६-३ | योगे॑ योगे | सं.४-१-२-४ |

| | | |
|---|---|---|
| मं.प्र.१-७-५ | इडा॑मग्ने | सं.४-२-४-९ |
| मं.प्र.२-४-२ | इ॒मम॑ग्न॒ आयु॑षे॒ वर्च॑से | सं.२-३-१०-१० |
| मं.प्र.२-४-१३ | तत्स॑वि॒तुर्व॑रे᳚ण्यं | सं.१-५-६-१२ |
| मं.प्र.२-७-१३ | आपो॒ हिष्ठा म॑यो॒ भुवः॑ | सं.४-१-५-(२-४) |
| मं.प्र.२-७-१६ | हिर॑ण्यवर्णाः॒ शुच॑यः (३) | सं.५-६-१-(१-३) |
| मं.प्र.२-११-१ | धा॒ता ददा॑तु नो र॒यिं (४) | सं.३-३-११ (७-१०) |
| मं.प्र.२-११-५ | यस्त्वा॑ हृ॒दा की॒रिणा᳚ (४) | सं.१-४-४६ (१-४) |
| मं.प्र.२-११-१० | रा॒काम॒हं | सं.३-३-११-१५ |
| मं.प्र.२-११-११ | यास्ते॑ रा॒के | सं.३-३-११-१६ |
| मं.प्र.२-१२-१ | दि॒वस्परी॒त्ये॒षो॑ऽनु॒वा॒कः । | सं.४-२-२ |
| मं.प्र.२-१४-५ | अ॒ग्निरायु॑ष्मा॒निति॒ पञ्च॑ । | सं.२-३-१०-(११-१५) |
| मं.प्र.२-१५-१५ | अन्न॑पत॒ इत्ये॒षा । | सं.४-२-३-१ |
| मं.प्र.२-१५-१८ | वास्तो᳚ष्पते | सं.३-४-१०-(१-२) |
| मं.प्र.२-१७-५ | नमो॑ अस्तु स॒र्पेभ्यः॑ | सं.४-२-८-(७-९) |
| मं.प्र.२-१७-१४ | स॒मीची॒ नामा॑सि (६) | सं.५-५-१०-(१-६) |
| मं.प्र.२-१७-२० | हे॒तयो॒ नाम॑स्थ (६) | सं.५-५-१०-(८-१३) |
| म.प्र.२-१८-८ | स्यो॒ना पृ॑थिवि | आ.१०-१-४८ |
| मं.प्र.२-१८-९ | बडि॒त्था पर्व॑तानां | सं.२-२-१२-११ |
| मं.प्र.२-१८-४६ | नमो॑ निष॒ङ्गिण॑ इषुधि॒मते᳚ | सं.४-५-३-३ |
| मं.प्र.२-१८-४७ | क्षेत्र॑स्य॒ पति॑ना व॒यं | सं.१-१-१४-७ |
| मं.प्र.२-२०-३३ | इ॒यमे॒व सा या प्र॑थमा (३) | सं.४-३-११-(१-३) |
| मं.प्र.२-२२-७ | आव॑र्तन वर्तय | सं.३-३-१०-३ |

( पुनरुक्तानि प्रतीकानि न निर्दिष्टानि)

॥ शुभमस्तु नित्यम् ॥

*******

# ४. तैत्तिरीय यजुर्वेदान्तर्गत ‘प्रतीक’ मन्त्राणां अकारादि अनुक्रमणिका॥

| प्रतीकम् | | मन्त्र भागः |
|---|---|---|
| ब्रा.२-६-३-८ | अग्न॒ आयू॑ꣳषि पवसे | सं.१-३-१४-२३ |
| सं.२-५-१२-९ | अग्ना॑विष्णू॒ | सं.१-८-२२-१ |
| सं.२-५-१२-१० | अग्ना॑विष्णू॒ | सं.१-८-२२-२ |
| मं.प्र.२-१४-५ | अ॒ग्निरायु॑ष्मान् (५) | सं.२-३-१० (११-१५) |
| सं.१-५-११-१३ | अ॒ग्निर्मू॒र्धा दि॒वः | सं.४-४-४-१ |
| ब्रा.२-६-१६-१० | अग्नि॑ष्वात्ताः पितरः | सं.२-६-१२-५ |
| ब्रा.२-८-७-३१ | अग्नीषोमावि॒मꣳ | सं.२-३-१४-९ |
| ब्रा.२-८-७-३२ | अग्नीषोमा ह॒विषः॑ | सं.२-३-१४-११ |
| सं.४-२-११-११ | अग्ने॒ नय॑ सुपथा᳚ | सं.१-१-१४-९ |
| ब्रा.२-६-३-९ | अग्ने॒ पव॑स्व॒ स्वपाः᳚ | सं.१-३-१४-२४ |
| ब्रा.२-७-८-३ | अ॒ङ्क्षौ न्य॒ङ्क्षौ | सं.१-७-७-८ |
| आ.२-३-१३ | अति॑ क्रामामि | ब्रा.३-७-१२-१२ |
| ब्रा.२-८-४-२६ | अति॒ विश्वाः᳚ परि॒ष्ठाः | सं.४-२-६-११ |
